CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 782

Title Viṣṇusahastranāma bhāṣya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 782 Subject: Stotra

Title: Viṣṇusahastranāmabhāṣya.

Author: Śaṅkarācārya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10" by 6" Extent: 57 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

ॐ श्रीगणेशाय नमः ॥ सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे ॥ नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥ यस्य स्मरणमात्रेण जन्मसंसारबंधनात् ॥ विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ २ ॥ कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतं ॥ वेदाब्जभास्करं वंदे शमादिनिलयं मुनिं ॥ ३ ॥ सह

वैशंपायन उवाच ॥ श्रुत्वा धर्मानशेषेण
पावनानि च सर्वशः ॥ युधिष्ठि
रः शांतनवं पुनरेवाभ्यभाषत ॥
श्रीगणाधिपतये नमः ॥

स्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ॥ सहस्रनामस्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै ॥ ४ ॥ श्रुत्वेति ॥ धर्माननशेषेण निःशेषतो ज्ञानहेतुभूतान् ॥ वेदलक्षणान् शोधनकारणेन पावनानि पापक्षयकरीणि सर्वशः सर्वप्रकारैः श्रुत्वा युधिष्ठिरो धर्मपुत्रः शांतनवं शंतनुसुतं भीष्मं

किमेकं दैवतमित्यादि ॥ दैवतं देव इत्यर्थः ॥ स्वार्थे तद्धितविधानात् ॥ लोके लोकनहेतुभूते समस्त विद्यास्थाने ॥ उक्तं यदाज्ञया प्रवर्तंते ॥ किं वाप्येकं परायणं किं परमयनं प्राप्तव्यं परायणं ॥ यस्मिन् विदिते भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे रिति श्रुतेः ॥ यस्य वचनमात्रेण आनंदलक्षणो मोक्षः प्राप्यते ॥ यदिहाज्ञविभेतिकुतश्चनेति ॥ यद्वा विष्ट

युधिष्ठिर उवाच ॥ किमेकं दैवतं लोके किं वाप्ये
कं परायणं ॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः ॥
शुभं ॥ २ ॥

स्य न विद्यते पुनर्भवः ॥ यस्य च वेदनात् देव भवति ॥ यद्विहायापरः पंथा नूनं नास्ति ॥ तद् एकं परायणं च लोके ॥ यत्तत्किमिति द्वितीयः प्रश्नः ॥ कं कतमं देवं स्तुवंतः गुणसंकीर्तनं कुर्वंतः ॥ कं कतमं देवमर्चंतः बाह्यमाभ्यंतरं चार्चनं बहुविधं कुर्वंतः मानवाः मनुष्याः शुभं कल्याणं स्वर्गापवर्गादिफलं प्राप्नुयुः लभेयुरिति पुनः प्रश्नद्वयं ॥ २ ॥ ॥ ॥ ॥

ॐ वि॰टी॰ २ कोधर्म इत्यादि ॥ सर्वोक्तलक्षणः सर्वधर्माणां सर्वेषां धर्माणां मध्ये भवतः परमः श्रेष्ठ
सो मतः अभिप्रेत इत्यर्थः ॥ पंचमः प्रश्नः किं जपन्नित्यादि ॥ किं जपं जपन् मुमुक्षुर्मा
नसलक्षणं जपं कुर्वन् ॥ जंतुर्जननधर्मा ॥ अनेन जंतुशब्देन जपाचैनस्त्ववादिषु य
थायोगं सर्वप्राणिनामधिकारं सूचयति ॥ जन्मसंसारबंधनात् ॥ जन्माज्ञानविजृंभि

को धर्मः सर्वधर्माणां भवतः परमो मतः ॥
किं जपन्मुच्यते जंतुर्जन्मसंसारबंधनात् ॥
॥ ३ ॥

तानामविधानत्कार्याणामुपलक्षणं ॥ संसारो विधानाभ्यां जन्मसंसाराभ्यां यद्बंधनं तस्मा
न्मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः ॥ जन्मसंसारबंधनादिति इदमुपलक्षणं ॥ इतरेषां फला राम
नामपि ॥ एतद्ग्रहणं मोक्षस्य प्राधान्यख्यापनार्थं ॥ ३ ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ ः ॥

सर्वेषां शत्रूणां भयहेतुर्भीष्मो मोक्षधर्मादीनां प्रवक्ता सर्वज्ञः षट् प्रश्नाः कथिताः ॥ पश्चात्प्र
नंतरो जप्यविशेषस्य प्रश्नो नन श्लोकेन परिक्रियते जगत्प्रभुमिति ॥ जगत् जंगमाजंगमात्मकं
प्रभुः स्वामी ॥ तमेव सर्वदेवानां देवं ॥ अनंतं देशतः कालतो वस्तुतश्चापरिच्छिन्नं ॥ पुरुषो

भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनंतं
पुरुषोत्तमं ॥ स्तुवन्नामसहस्रेण पुरु
षः सततोत्थितः ॥ ४ ॥ रामकृष्णाय नमः

त्तमं क्षराक्षराभ्यां नित्यानित्याभ्यामुत्कृष्टं ॥ नामसहस्रेणानां नामसहस्रेण स्तुवं गुणवान्
कीर्तयन् ॥ सततोत्थितो निरंतरमुद्युक्तः पुरुषः पूर्णत्वात्पुरिशयनाद्वा पुरुषः सर्वदुःखा
तिगो भवेदिति सर्वत्र संबध्यते ॥ ४ ॥ ॥ ॥ रामजयति

श्री वि॰ टी॰ ५

उत्तरेण श्लोकेन चतुर्थः प्रश्नः परिह्रियते ॥ तमेव चार्चयन्दुःखातिगो भवन् तमेव चार्चय
न्नाराधयन्नर्चनं कुर्वन्नित्यं सर्वेषु कालेषु भक्त्या भजन्ननेनात्र पुरुषमव्ययं विनाशवि
क्रियारहितं ॥ ध्यायन्नाभ्यन्तरार्चनं कुर्वन् स्तुवन्स्तवोक्तेन नमस्यन्नमस्कारं कुर्वन्निति शेषः न
उभयत्रापि नमस्कारलक्षणं ॥ यजमानः पूजकः फलभोक्ता ॥ अथवार्चयन्नित्यनेनोभयमध्य
नूद्यते ॥ ध्यायंस्तुवन्नमस्यंश्चेति मानसं वाचिकं कायिकं चोच्यते ॥४॥ द्वितीयप्रश्नं परिहरति

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययं ॥ ध्यायंस्तुवन्
नमस्यंश्च यजमानस्तमेव च ॥५॥ अनादिनिधनं विष्णुं
सर्वलोकमहेश्वरं ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भ
वेत् ॥६॥

उत्तरैस्त्रिभिः पादैः ॥ अनादिनिधनं षड्भावविकारवर्जितं ॥ विष्णुं व्यापनशीलं सर्वस्य लोकान्त
र्निहृष्यपवर्गो लोकस्तस्य नियन्तृणां ब्रह्मादीनामपि ईश्वरत्वात्सर्वलोकमहेश्वरं ॥ लोकं दृष्यवर्गं
स्वाभाविकेनावबोधेन साक्षादीक्षणं अपनीति लोकाध्यक्षं ॥ स्तुवन्नित्यं निरंतरं स्तुवन् सर्वदुःखाति
गो भवेदिति त्रयाणां साधारणं फलवचनं ॥ सर्वाण्याध्यात्मिकादीनि दुःखान्यतीत्य गच्छतीति

सर्वदुःखातिगो भवेत्

राम ३

अस्य श्रीविष्णोर्दिव्यसहस्रनाममहामंत्रस्य भगवान् वेदव्यास ऋषिः श्रीकृष्णः परमात्मा सुवर्णबिंदु
रिति बीजं उद्भवः क्षोभणो देव इति परमो मंत्रः देवकीनंदनः स्रष्टेति शक्तिः शंखभृन्नंद
की चक्रीति कीलकं त्रिसामा सामगः साम इति कवचं सर्वप्रहरणायुध इत्यस्त्रं ॥ ॐ विश्वं वि
ष्णुर्वषट्कार इति ध्यानं ममाशेषपुरुषार्थप्रदः श्रीवासुदेवप्रीत्यर्थे सर्वपापक्षयार्थे जपे विनियो ८८
गः ॥ ॐ विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः ॥ ब्रह्मण्यो ब्रह्मीति मध्यमाभ्यां नमः ॥ सुवर्णबिंदुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ आदित्यो ज्योतिरादित्य इति कनिष्ठिकाभ्यां नमः ॥ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदादिन्यासः ॥ श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥ अथ ध्यानम् ॥ विष्णुं भास्वत्किरीटांगदवलय
गल्लाकल्पहारोदरांघ्रिश्रोणिवक्षोविभूषं मणिमकरमहाकुंडलामंडितांसं ॥ हस्तोद्यच्चक्र
शंखांबुजगदममलं पीतकौशेयवासं विद्योतद्भासमुद्यद्दिनकरसदृशं पद्मसंस्थं नमा
मि ॥ ॐ विश्वं विष्णुर्महाविष्णुः प्रभविष्णुर्महेश्वरं ॥ अनेकरूपदैत्यान्तं नमामि पुरुषोत्त
।२। ।२। ।२। २
मं ॥२॥ ॥२॥ ।२। ।२। ।२ राम। ।२ राम। ।२ राम। २ राम। २
राम ॥२ ॥ राम ।२। राम। ।२। राम। ।२

ग्रं
वि·टी·
४

विष्णुसहस्रनाम ॥ ८ ॥

ब्रह्मण्यं ब्रह्मणे स्वेष्टं ब्राह्मणाय तपसे श्रुतये हितं सर्वान् धर्मान् जानातीति सर्वधर्मज्ञः तं लोकानां प्राणिनां कीर्तिं यशांसि स्वशक्त्यनुप्रवेशेन वर्द्धयंतं ॥ लोके नाथते याचते लोकानुपतपत्याशास्ते लोकानामीष्टे इति लोकनाथं ॥ महद्भूतं ब्रह्म विद्योत्कर्षेण वर्तमानत्वाद्भूतं परमार्थसत्यं स्वतःसिद्धं ॥ सर्वभूतानां भवः संसारो यत्सकाशादुद्भवति सर्वभूतभवोद्भवं ॥७॥ पंचमः प्रश्नः परिह्रियते ॥ सर्वेषां वेदलक्षणधर्माणां एष वक्ष्यमाणो धर्मोऽधिकतमो मम

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्द्धनं ॥ लोकनाथं महद्भूतं सर्व
भूतभवोद्भवं ॥७॥ एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥ यद्भक्त्या पुं
डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥८॥

मतोऽभिप्रेतः ॥ यत्तु भक्त्या तात्पर्येण पुंडरीकाक्षं हृदयपुंडरीके प्रकाशमानं वासुदेवं स्तवैर्गुणकीर्तनस्तुतिभिरर्चयेत् ॥ सत्कारपूर्वकमर्चनं करोति ॥ नरो मनुष्य इति यदेष धर्म इति संबंधः ॥ अस्य स्तुतिलक्षणस्याधिक्ये किं कारणं ॥ उच्यते ॥ हिंसादिपुरुषांतरद्रव्यांतरदेशकालादिनियमानपेक्षत्वादित्याधिक्ये कारणं ॥ ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशव ॥ मिति विष्णुपुराणव

हृदीयं प्रश्नं समाधत्ते ॥ परमं प्रकृष्टं महद्बृहत्तेजश्चैतन्यलक्षणं सर्वावभासकं ॥ येन सूर्यस्तपति तेजसेद्धः तद्देवा ज्योतिषां ज्योतिः ॥ न तत्र सूर्यो भाति न च चंद्रतारकं नेमा विद्युतः कुतोऽयमग्निर्भातीत्यादिश्रुतेः यदादित्यगतं तेजो जगद्भासयतेऽखिलमित्यादिस्मृतेश्च परमं तपः तपत्याज्ञापयति ॥ इमं च लोकं परं च लोकं सर्वाणि भूतानि योंतरो यमयतीत्यादिश्रुतेर्नियंत्रात्वेन सर्वनियंतृत्वं श्रूयते ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेंद्र

परमं यो महत्तेजः परमं यो महत्तपः ॥
परमं यो महद्ब्रह्म परमं यः परायणं ॥९॥

श्च मृत्युर्धावति पंचम इत्यादिश्रुतेः ॥ तपतीष्टे इति वा ॥ तपोऽस्यैश्वर्यमनवच्छिन्नमिति महत्त्वं एष सर्वेश्वर इत्यादिश्रुतेः ॥ परमं सत्यादिलक्षणं परं ब्रह्म महती घनतया महत्परमं प्रकृष्टं पुनरावृत्तिशंकावर्जितं परमयनं णात्सर्वेषां परं तेज आदित्यादिकं व्यावर्त्यते ॥ सर्वशब्दो देव इति विशेष्यते ॥ यो देवः परमं तेजः परमं तपः परमं ब्रह्म परमं परायणं स एकं परमाणामिति

प्रथमप्रश्नोत्तरमाह॥ पवित्राणांपवित्रंपावनानांतीर्थादीनांपरमत्तमानुध्यातो दृष्टःकीर्तितः
स्तुतःपूजितःसंस्मृतःप्रणतःसर्वान्पापान्नदलयतीतिपरमंपवित्रं॥ संसारबंधहेतुभूतंपु
ण्यापात्मकंकर्मतत्कारणंचाज्ञानंसर्वंनाशयत्वयोस्यज्ञानेनेनिर्वाणपवित्राणांपवित्रं॥ यन्ना
मकीर्तनंभक्त्याविलापयनमनुत्तमं॥ मैत्रेयाशेषपापानांधातूनामिवपावकः॥१॥ अवशे
नापियन्नाम्निकीर्तितेसर्वपातकैः॥ पुमान्विमुच्यतेसद्यःसिंहत्रस्तैर्मृगैरिव॥२॥ यामालय

पवित्राणांपवित्रंयोमंगलानांचमंगलं॥१०॥
दैवतंदेवतानांचभूतानांयोऽव्ययःपिता

नलंवल्हेस्तमसोभास्करोदयः॥ तांतिकलेरघौघस्यनामसंकीर्तनंहरेः॥३॥ स्तुत्वादेवंवासुदे
वंविपापोजायतेनरः॥ विष्णोःसंपूजनान्नित्यंसर्वपापंप्रणश्यति॥४॥ कलावत्रापिदोषाढ्ये
विषयासक्तमानसः॥ कृत्वापिसकलंपापंगोविंदंसंस्मरन्शुचिः॥५॥ लोकत्रयाधिपतिमप्र
तिमप्रभावमीषत्प्रणम्यशिरसाप्रभविष्णुमीशं॥ जन्मांतरप्रलयकल्पसहस्रजातमाशुप्रण
श्यत्यानिनरस्यपापं॥६॥ शाठ्येनापिनमस्कारःप्रयुक्तश्चक्रपाणये॥ संसारस्थूलबंधानामुद्वे

ध्यायन्नारायणंदेवंस्नानादिषुचकर्मसु॥ प्रायश्चित्तंहिसर्वस्यदुःकृतस्येतिवैश्रुतिः॥९॥ संसार
सर्पसंदष्टनष्टचेष्टैकभेषजं॥ कृष्णेतिवैष्णवंमंत्रंश्रुत्वामुक्तोभवेन्नरः॥१०॥ सर्वदासर्वकार्येषु
नास्तितेषाममंगलं॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः॥११॥ नित्यंसंचिंतयंतोयेयोगयुक्ता
जनार्दनं॥ सास्वरत्नापरामन्येकोहिनतपश्चुनाश्रयं॥१२॥ रूपमारोग्यमर्थांश्चभोगांश्चैवानुषं
गिकान्॥ ददातिध्यायतांनित्यमपवर्गप्रदोहरिः॥१३॥ चिंत्यमानःसमस्तानांक्लेशानांहानि
दोहियः॥ समुत्सृज्याखिलंचिंत्योसोच्युतःकिंनचिंत्यते॥१४॥ गंगास्नानसहस्रेषुपुष्करस्ना
नकोटिषु॥ यत्पापंविलयंयातिस्मृतेनष्टंतितद्धरेः॥१५॥ अतिपातकयुक्तोपिध्यायन्निमिष
मच्युतं॥ भूयस्तपस्वीभवतिपंक्तिपावनपावनः॥१६॥ जानतोऽजानतोवापिवासुदेवस्यकी
र्तनात्॥ तत्सर्वंविलयंयातितोयस्थंलवणंयथा॥१७॥ मुहूर्तमपियोध्यायेन्नारायणमतं
द्रितः॥ सोपितद्गतिमाप्नोतिकिंपुनस्तत्परायणः॥१८॥ एकस्मिन्नप्यतिक्रांतेमुहूर्तेध्यानवर्जि
ते॥ दस्युभिर्मुषितेनेवयुक्तमाक्रंदितंभृशं॥१९॥ जनार्दनंभूतपतिंजगद्गुरुंस्मरन्मनुष्यः
सततंमहामुने॥ दुःखान्यशेषाण्यपहंतिसाधयत्यशेषकार्याणिचयान्यभीप्सितं॥२०॥ एव
मेकाग्रचित्तःसंसंस्थितोमधुसूदनं॥ जन्ममृत्युमहाग्राहंसंसाराब्धिंतरिष्यति॥२१॥ यथाग्नि
रुद्धतशिखःकक्षंदहतिसानिलः॥ तथाचित्तस्थितोविष्णुर्योगिनांसर्वकिल्बिषं॥ तस्मादेव

जनकरोहिसः॥७॥ प्रायश्चित्तान्यशेषाणितपःकर्मात्मकानिवै॥ यानितेषामशेषाणांकृष्णानुस्मरणंपरं॥८॥

गे॰
वि॰टी॰
९

वनात्॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे
इत्यादिश्रुतेश्च॥ मंगलानां च मंगलं॥ दैवतं देवतानां देवानां देवो द्योतनादिभिः सम्मुत्कर्षे
ण वर्त्तमानानां भूतानां अव्ययरहितः पिता॥ जनको यो देवः स एकं दैवतं लोक इति वाक्या
र्थः॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा॥ सर्वाध्यक्षः सर्वभूताधिवा
सः॥ साक्षी चेता केवलो निर्गुणश्च॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्राहिणोति तस्मै
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्वेताश्वतराणां मंत्रोपनिषदि
से यदेवतैत्तेनिक्षादोग्येनत्व कथमेको देवो जीवपरयोर्भेदात्॥ न तस्त्वानां देवा
श विशान्स एष इह प्रविष्ट आ नखाग्रेभ्य इत्यादिश्रुतिभ्यो विक्रान्तस्य परस्य बुद्धिनहे स
सात्तित्वेन प्रवेशश्रवणात् न भेदः प्रविष्टानामितरेतरभेदात् परानेकत्वमिति चेत्॥ न ए
को देवो बहुधा संनिविष्टः॥ एकः सन्बहुधा विचचार त्वमेकोऽसि बहून्ननुप्रविष्ट इत्येक
स्यैव बहुधा प्रवेशश्रवणात्॥ प्रविष्टानां परस्परं न भेदः॥ हिरण्यगर्भ इत्यष्टौ मंत्राः॥
कस्मै देवाय हविषा इत्येकस्तौपेन एतद्देवप्रतिपादकास्तैत्तिरीयके॥ अग्निर्यथैको भुवनं प्र
विष्टो रूपं रूपं प्रतिरूपो बभूव॥ एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ९
एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति॥ तमात्मस्थं येऽनुपश्यन्ति धी

रास्तेषां सुखं शाश्वतं नेतरेषां॥ नित्यो नित्यानां चेतनश्चेतनानां॥ एको बहूनां यो
विदधाति कामान् तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषामिति
क॰॥ वल्लीषु॥ ब्रह्म वा इदमग्र आसीत्॥ एकमेव तदेकं सन्न व्यभवत्॥ नान्योऽतोऽस्ति
द्रष्टा नान्योऽतोऽस्ति श्रोता इत्यादि बृहदारण्यके॥ अनेजदेकं मनसो जवीयो नैनद्देवा
आप्नुवन्पूर्वमर्शत्॥ तत्र को मोहः कः शोक एकत्वमनुपश्यत इति ईशावास्ये॥ स
र्वेषां भूतानां मनरः पुरुषः समस्तान्मेति विधान॥ आत्मा वा इदमेक एवाग्र आसी
न्नान्यत्किंचन मिषत्॥ एकं सद्विप्रा बहुधा वदन्ति॥ एकं सन्तं बहुधा कल्पयन्ति॥
को विममे त्रिभिरित्यादिभिः॥ एको दाधार भुवनानि विश्वा इति ऋग्वेदे॥ सदेव सो
म्येदमग्र आसीत्॥ एकमेवाद्वितीयं ब्रह्म इति छन्दोगे॥ सर्वभूतस्थितं यो मां भजत्येकत्व
मास्थितः॥ सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते॥ विद्याविनयसंपन्ने इत्या
दि॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः॥ यदा भूतपृथग्भावमेकस्थमनु
पश्यति॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा॥ यथा प्रकाशयत्येकः कृत्स्नं लो
कमिमं रविः॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥ सर्वधर्मान्परित्यज्य
मामेकं शरणं व्रज॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इति श्रीमद्भगव

ओं
वि॰टी॰
७

धीनास्तु॥ हरिरेकः सदाध्येयो भवद्भिः सत्वसंस्थितैः॥ ओमित्येवं सदा विप्राः पठध्वंध्या
तकेशवं॥ आश्चर्यं खलु देवानामेकस्त्वं पुरुषोत्तम॥ धन्यश्चासि महाबाहो लोके नान्यो
स्ति कश्चनेति श्रीहरिवंशे॥ सर्गस्थित्यंतकरणब्रह्मविष्णुशिवात्मिकां॥ स संज्ञां या
ति भगवानेक एव जनार्दनः॥ तस्मान्न विज्ञानमृतेस्ति किंचित्क्वचित्कदाचिद्द्विज
वस्तुजातं॥ विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतं॥ ज्ञानं विशुद्धं विम
लं विशोकमशेषलोभादिनिरस्तसंगं॥ एकं सदेकं परमः परेशः स वासुदेवो न यतो
न्यदस्ति॥ यदा समस्तदेहेषु पुमानेको व्यवस्थितः॥ तदा हि को भवान्सोहमित्येतद्वि
फलं वचः॥ सितनीलादिभेदेन यथैकं दृश्यते नभः॥ भ्रान्तदृष्टिभिरात्मापि तथैकः स
न्पृथक्पृथक्॥ एकः समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोन्यत्॥ सोहं स प
त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहं॥ इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थ
दृष्टिः॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः॥ इति मतिरमला भवत्व
नंते हृदयगते व्रजतान्विहाय दूरात्॥ यथाह वसुधा सर्वं सत्यमेव दिवौकसः॥ अहं
भवो भवंतश्च सर्वं नारायणात्मकं॥ विभूतयस्तु यास्तस्य तासामेव परस्परं॥ आधिक्य
न्यूनता बाध्यबाधकत्वेन वर्तते॥ भवानहं च विश्वात्मन्नेक एव हि कारणं॥ जगतोस्य ज

श्रा

राम
७

गत्पर्यर्थं भेदेनावां व्यवस्थितौ॥ त्वया यदभयं दत्तं तद्दत्तमखिलं मया॥ मत्तो विभिन्नमात्मानं
द्रष्टुं नार्हसि शंकर॥ योहं स त्वं जगच्चेदं सदेवासुरमानुषं॥ अविद्यामोहितात्मानः पुरुषा भि
न्नदर्शिन इति विष्णुपुराणे॥ विस्तारन्यं तु पश्यन्ति ये मां ब्रह्माणमेव च॥ कृतकं मन्त यो मूढाः
पच्यन्ते नरकेष्वधः॥ ये च मद्भक्ता उत्तमा नो भिन्नं पश्यन्ति मां हरिं॥ ब्रह्माणं च तथा तेषां भ्रूणहत्या
समं त्वघमिति भविष्यपुराणे श्री महेश्वरवचनं॥ आत्मेति तूपगच्छंति तथैव ग्राहयंति च॥ आ ८०
२ त्मेत्येवं प्रथमोक्तं विशेषेणाहमेव सः॥ परमात्मा प्रतिपत्तव्यस्तथा हि परमात्मप्रक्रियायां २
जाबाला आत्मत्वेनैवमभ्युपगच्छंति त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते इति
तथान्येपि यदेवेह तदमुत्र तदन्विह॥ स यश्चायं पुरुषे यश्चासावादित्ये स एक तदात्मनमेव
वेदहं ब्रह्मास्मीति॥ न देतद्दृश्यात्सर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म स वा एष महान
ज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्मेत्येवमादयश्चात्मोपगमाद्द्रष्टव्याः॥ नोदयंति चमात्म
त्वेनैवेश्वरं वेदान्तवाक्यानि॥ एष त आत्मा सर्वांतरः॥ एष त आत्मान्तर्याम्यमृतः॥ यन्मनसा न
मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि तत्सत्यं॥ स आत्मा तत्त्वमसीत्येवमादीनि॥ ननु प्र
तीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति॥ तदयुक्तं॥ गौणत्वप्रसंगाद्वाक्यवैरूप्या
च्च॥ यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति यथा मनो ब्रह्मेत्यादि॥ इह

गीं॰ टी॰ ८

पुनस्त्वमहमस्म्यहं नन्वमसीत्याह॥ अतः प्रतीकश्रुतिवैरूप्याद्भेदप्रतिपत्तिः॥ भेददृष्ट्य
पवादाच्च॥ न यथाहि॥ अथ योन्यां देवतामुपास्तेन्योसावन्योहमस्मीति न स वेद यथा पशुः
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति॥ एवं ध
र्मान्पृथक्पश्यंस्तानेवानुविधावति॥ द्वितीयाद्वै भयं भवति॥ यदा ह्येवैष एतस्मिन्नुदरम
न्तरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषो मन्वानस्य सर्वं तं परादाद्योन्यत्रात्मनः स
र्वं वेदेत्येवमाद्या भूयसी श्रुतिर्भेददर्शनमपवदति॥ आत्मैवेदं सर्वं आत्मनि विज्ञाते सर्व
मिदं विज्ञातं भवति॥ इदं सर्वं यदयमात्मा ब्रह्मैवेदं सर्वमिदं ब्रह्मेति श्रुतिः तथा च स्मृति
रपि॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि
क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं इत्यसीत्यर्थः॥ सर्वभूतेषु येनैकं भावमव्ययमीक्ष
ते॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकमिति॥ अद्वैतात्मज्ञानं सम्यग्दर्शनमित्युक्तं
भगवतापि॥ तस्मादात्मन्येवेश्वरे मनो दधीत॥ सिद्धेर्थेपि वेदस्य प्रमाणत्वमपुरुषार्थत्वापत्त
साधनार्थमंगीकार्यमर्थमाहुर्वत यथापरोपि वेदयेतृक्रतेः परमार्थहकादेर्थह भवतीत्य
भिमुक्तैरुक्तं॥ अन्यान्वितस्वार्थपादानां सामर्थ्यं न कार्यान्वितस्वार्थे तथा सत्यर्थवादपदा
नामासामर्थ्यप्रसंगादन्वयबुद्धेस्तत्त्वान्नहि भवति वायुर्वा आलभेत तोपि वा आलभेत राम ८

निरागस्यैव प्रवर्तकत्वान्न नियोगस्य च तथा च श्रुतिः॥ अथो खल्वाहुः काममय एवा
यं पुरुष इति॥ स यथाकामो भवति तत्क्रतुर्भवति तत्कर्म कुरुते तदभिसंपद्यते॥ तथा
च स्मृतिरपि॥ अकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित्॥ यद्यद्धि कुरुते किंचि
त्तत्तत्कामस्य चेष्टितं॥ काम एष क्रोध एष इति च॥ अन्यपराणामपि मंत्रार्थवादानां
क प्रामाण्यमंगीकर्तव्यं॥ तेषामप्रामाण्ये कथं नेनोरगत्वं गतवान्नहुषः॥ कथं॥ अत्र यत्तु प
रिष्यानां बाध्यमानानां दुरात्मना॥ देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः॥ पप्रच्छुः संश
यो नेतु नहुषं पापचेतसं॥ य इमे ब्राह्मणाः प्रोक्ता मंत्रा वै प्रोक्षणे गवां॥ एते प्रमाणं भवत
उताहो नेति वासव॥ नहुषो नेति तानाह तमसा गतचेतनः॥ ऋषय ऊचुः॥ अधर्मे
हि संवृत्तस्त्वं धर्मं च विजहासि सि॥ प्रमाणमेतदस्माकं पूर्वैः प्रोक्तं महर्षिभिः॥ अगस्त्य उवा
च॥ ततो विवदमानः स ऋषिभिः सह पार्थिवः॥ अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडि
तः॥ तेनाभूद्धततेजाः स निःश्रीकश्च महीपतिः॥ ततः तमहमापन्नकमवोचं भयपीडि ध्रु
तं॥ यस्मात्पूर्वैः कृतं मार्गं महर्षिभिरनुष्ठितं॥ अदुष्टं दूषयसि वै यच्च मूर्ध्न्यस्पृशत्पदा
यच्चापि त्वमृषीनन्धान्ब्रह्मकल्पान्दुरासदान्॥ वाहयान्कृत्वा वाहयसि तेन स्वर्गात्पतिष्य
सि॥ ततः पापः परिभ्रष्टः क्षीणपुण्यो महीतलं॥ दशवर्षसहस्राणि सर्परूपधरस्तथा

जै
वि·टी·
९

विचरिष्यसि भूपाल पुनः स्वर्गमवाप्स्यसि ॥ इत्याद्युधिष्ठिरं नाम तव वंशसमुद्भवमिति म रे
हाभारते ॥ अतः श्रेष्ठेयमात्मानं ॥ अश्रद्दधानाः पुरुषाः धर्मस्यास्य परंतप ॥ अप्राप्य मां नि
वर्त्तन्ते मृत्युसंसारवर्त्मनीति भगवतोक्तं ॥ ये नस्येकेच ॥ एवं पंचापातकमपनद्र्यपत
न्स्यं तस्मान्न प्रमाद्येन्न जातीयान्न त्यजेत् ॥ इदं वै ये न्याय्यं ते पराबभूवुः ॥ नतु सर्वाः प्र
जा हन्ति स्वास्त्रन्यायमीश्वरिति ॥ प्राचैना इमाः प्रजास्ति स्वान्न्यायमा यंस्तानीमानिव
यांसि वंगावगधाश्चेरपादा इति श्रुतेः ॥ वंगावनगाहृत्वा वगधाश्चैव पयस्चेरपादाउरः
पादाः ॥ न यार्ईशावास्य ॥ अविहन्निदार्योमं त्रः ॥ असुर्या नाम ते लोका अंधेन तमसा
वृताः ॥ तांस्ते प्रेत्यापि गच्छंति ये के चात्महनो जना इति ॥ तैत्तरीयके च ॥ असन्नेव स भव
ति असद्ब्रह्मेति वेद वेदिति ॥ तथा शाकुंतलोपाख्याने ॥ योन्यथा संतमात्मानमन्यथा प्र
तिपद्यते ॥ किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥ सहस्रनामजपस्यानुरूपं स्नानमु
च्यते ॥ यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकतां ॥ व्रजेत्तस्मात्तत्संतीर्थं यस्मिन्स्नात्वाऽमृ न
तो भवेत् ॥ ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे ॥ यः स्नाति मानसे तीर्थे स याति पर
मां गतिं ॥ आत्मा नदी संयमपुण्यतोया सत्यावहा शीलतटा दयोर्मिः ॥ तत्राभिषेकं कु राम
रु पांडुपुत्र न वारिणा शुद्ध्यति चांतरात्मेति महाभारते ॥ मानसं विष्णुचिंतनमिति वि ९

अथ ॥ नाम्नां सहस्रं लोकानामुपकारकरं शुभं

मुच्यते ॥ यथैवैनं न संसिद्ध्येद् ब्राह्मणो नात्र संशयः ॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उ
च्यत इति मनुवचनं ॥ यज्ञानां जपयज्ञोस्मीति भगवद्वचनं ॥ श्रीगीतासु ॥ अपवित्रः पवित्रो
वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ यदेकं दैवतं प्रस्तुत
न सोपलक्षणमुच्यते ॥ यस्मात्सर्वाणि भूतानि संभवंति इवंति च ॥ आदियुगागमे यस्मिंश्च

यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति
पुनरेव युगक्षये ॥ ११ ॥ तस्य लोकप्रधानस्य जगन्नाथ
स्य भूपते ॥ विष्णोर्नाम सहस्रं मे शृणु पापभयापहं ॥ १२ ॥

प्रलयं यांति विनाशं गच्छंति ॥ पुनर्भूय एवेत्यवधारणार्थं ॥ नान्यस्मिन्नित्यर्थः ॥ युगक्षये महा
प्रलये ॥ मध्येपि यस्मिंस्तिष्ठंति ॥ यतो वा इमानि भूतानि जायंत इत्यादिश्रुतेः ॥ ११ ॥ नस्य सर्वलोकस्ये
कस्य देवतस्य लोकप्रधानस्य लोकनहेतुभिः प्रतिपाद्यस्य जगन्नाथस्य भूपते ॥ विष्णोर्व्यापन
शीलस्य नाम्नां सहस्रं पापभयं चापहंतीति पापभयापहं ॥ मे मत्तः शृणु एकाग्रमना भूत्वा व

पारय ॥ १२ ॥ एकस्यैव समस्तस्य ब्रह्मणो द्विजस

ॐ वि.टी. १०

निमित्तशक्त्योर्नाम्नां भेदिनस्तदुदीरणात् ॥ विभिन्नान्येव साध्यंते फलानि हि जनार्दन ॥ य
त्किंचिन्नाम यत्तस्य तस्मिंस्तेवचवस्तुनि साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुष्विति विष्णुधर्म
वचनात् ॥ यद्यपि परस्य ब्रह्मणः षष्ठीगुणक्रियाजातिरूढानां शब्दप्रवृत्तिहेतूनां निमि
त्तशक्त्यादीनां वा संस्तवस्तथापि सगुणे ब्रह्मणि सविकारे च सर्वात्मत्वात् तेषां शब्दप्रवृत्तिहे

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये
॥ १३ ॥ ओं विश्वं विष्णुर्वषट्कारः ॥ ॥ १३ ॥ १३

तूनां संभवात्सर्वे शब्दाः परस्मिन्प्रवर्तंते ॥ यानि नामानि गौणानि गुणयोगात्प्रवृत्तानि तेषु
नानि विख्यातानि प्रसिद्धानि ॥ ऋषिभिर्मंत्रदर्शिभिश्च परिगीतानि भूतये पुरुषार्थचतुष्ट
यसिद्धये ॥ महात्मनो वासुदेवस्येति ॥ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ॥ यच्चास्य संततो
भावस्तस्मादात्मेति कथ्यत इति वचनात् ॥ अयमेव महानजश्चात्मेति महात्मा तस्य चि

राम १०

न्त्रं नामसहस्रेऽस्मिन्नादित्यादिशब्दानामर्थांतरे प्रसिद्धानां ग्रहणेऽपि स्तुतिस्त्वं ॥ देवतात्मा
वेंद्रियात्मा च प्रधानात्मा तथा भवान् ॥ आत्मा च परमात्मा च त्वमेकः पंचधा स्थितः ॥ ज्योतीं
षि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ॥ नद्यः समुद्राश्च स एव सर्वं यदस्ति
यन्नास्ति च विप्रवर्येति विष्णुपुराणे ॥ आदित्यानामहं विष्णुरित्यादिभ्यः ॥ अश्वत्थवावडेनैने
न किंचिदनेन तद्वाङ्न ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ इत्यनेन गीतोपनि
षदि भगवतोक्तं ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं ॥ पुरुष एवेदं विश्वं कर्म तपो ब्र
ह्म परामृतमित्यादि श्रुतिभ्यश्च ॥ विश्वादिशब्दानां पुनरुक्तानामपि वृत्तिभेदेनार्थभेदोऽन्यपौन
रुक्त्यं ॥ श्रीपति माधव इत्यादीनां सन्येकत्वेऽपि शब्दभेदादपौनरुक्त्यं ॥ अर्थैक्ये पौनरुक्त्यं न दोषा
य ॥ नाम्नां सहस्रस्य किमेकदैवत नामसहस्रैकदैवतविषयत्वात् ॥ यत्र पुंलिंगनामशब्दप्रयोग
स्तत्र विष्णुर्विशेष्यः ॥ यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवता विशेष्यते ॥ यत्र नपुंसकलिंगशब्दप्र
योगस्तत्र ब्रह्म विशेषणीयं ॥ यतः सर्वाणि भूतानि इत्याभ्यजगदुत्पत्तिस्थितिलयकारण
स्य ब्रह्मण एकदैवतत्वेनाभिहितत्वात् ॥ आपातनभयविधं ब्रह्म विश्वशब्देन वाच्यते ॥ विश्वस्य ज
गतः कारणत्वेन विश्वमित्युच्यते ब्रह्म ॥ आदौ तु विश्वमिति कार्यशब्देन कारणग्रहणं कार्यरूपवि
रच्यादि नामभिरुपपन्नत्वान्निर्विशेषीति दर्शयितुं ॥ यद्वा परस्मात्पुरुषान्न भिन्नमिदं विश्वमप

ओं
वि॰टी॰
११

रमार्थतस्तेन विश्वमित्यभिधीयते ब्रह्मैवेदं विश्वं परमार्थतस्तद्भिन्नं न किंचित्परमार्थतः ॥ सद
त्ति ब्रह्मैवेदं विश्वमिदं वरिष्ठं पुरुष एवेदं विश्वमित्यादिश्रुतेः ॥ अथवा विशन्ति विश्वं ब्रह्मण
स्मिन्स्थानदेवानुप्रविशन्ति श्रुतेः किं च सर्वतो विशंति विश्वानि भूतानि ब्रह्मणि ॥ यत्प्रयन्त्यभिसं
विशन्तीति श्रुतेः ॥ यथा हि सकलं यत्कार्यभूतं पटविशात्तु ज्ञाखिलं विशतीत्युभयथा विश्व
त्वेति श्रुतेः ॥ अन्यत्राधर्मादित्यारभ्य सर्वे वेदा यत्पदमामनंति ॥ तपांसि सर्वाणि च यद्वदंति ॥ य
दिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीम्योमिति ॥ एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं ॥
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकार इत्युपक्र
म्य यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत ॥ ओमिति ब्रह्म ॥ ओमितीदं
सर्वं ॥ तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक् संतृण्णोंकार एवेदं सर्वं
ओंकार एवेदं सर्वमित्येतदक्षरमिदं सर्वमित्युपक्रम्य ॥ प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः
अपूर्वोऽनंतरोऽबाह्यो नपरः प्रणवोऽव्ययः ॥ सर्वस्य प्रणवो ह्यादिर्मध्यमंतस्तथैव च ॥ सर्वं हि
प्रणवं ज्ञात्वा व्याप्नुते तदनंतरं ॥ प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितं ॥ सर्वव्यापिनमों
कारं मत्वा धीरो न शोचति ॥ अमात्रोऽनंतमात्रश्च द्वैतस्योपशमः शिवः ॥ ओंकारो विदितो येन राम ११
स मुनिर्नेतरो जन इत्यनामांडूक्योपनिषत् ॥ ओं तत्सद्वृत्य ॥ ओं नहाशुः ॥ ओं तदात्मा ॥ ओं तत्सदि

त्यादिश्रुतिभ्यः ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ रसोऽहमप्सु कौंतेय प्रभास्मि श
शिसूर्ययोः ॥ प्रणवः सर्ववेदेषु तेजश्चास्मि विभावसौ ॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्ष
रं ॥ आद्यंतमक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता ॥ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥ ओं
कारः स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्यते ॥ विकथां वान्यां कृत्वा एवं लौकि
क्या वाचा व्यावर्तते ॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ॥ वाङ्मयं प्रणवः सर्वं तस्मा
त्प्रणवमभ्यसेदित्यादिस्मृतिभ्यः ॥ विश्वशब्देनोंकारोऽप्यभिधीयते ॥ सर्वं खल्विदं ब्रह्म तज्जला
निति शांत उपासीतेति ॥ एतदुक्तं भवति ॥ यस्मात्सर्वमिदं विकारजातं ब्रह्मणस्तज्जत्वात्तल्लत्वा
त्तदनत्वाच्च ॥ न च सर्वस्यैकात्म्यत्वे रागादयः संभवंति तस्माच्छांत उपासीतेति श्रुतेः ॥
श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतां ॥ आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ आ
त्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥ निर्गु
णः परमात्मात्र देहे व्यापिनि स्थितः ॥ तमहं ज्ञानविज्ञेयं नावमन्ये न लंघये ॥ पद्याम
मेर्नर्विदेयं तमहं भूतभावनं ॥ क्षमयंतो गिरं चेमं हन्त मामिव सागरं ॥ बहुवैराणि भूता नि
नि द्वेषं कुर्वंति चेत्ततः ॥ शोच्या ह्यहो ते निमोहेन व्याप्ता वीति मणीषिणः ॥ एतेभिन्नदृशां दे
त्याविकल्पाः कथिता मया ॥ कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ॥ विस्तारः सर्वभू

ओं
वि॰ टी॰
१२

नस्य विष्णोः सर्वमिदं जगत् ॥ द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥ समुत्सृज्यासुरं भा
वं तस्माद्यूयं तथा वयं ॥ तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिं ॥ सर्वत्र दैत्याः समता
मुपेत समत्वमाराधनमच्युतस्य ॥ न मंत्रादिकृतस्तात न च नैसर्गिको मम ॥ प्रभाव एष सामा
न्यो यस्य यस्याच्युतो हृदि ॥ अन्येषां यो न पापानि चिंतयत्यात्मनो यथा ॥ तस्य पापागमस्तात
हेत्वाभावान्न विद्यते ॥ कर्मणा मनसा वाचा परपीडां करोति यः ॥ तद्बीजं जन्म फलति प्रभूतं
तस्य चाशुभं ॥ सोहं न पापमिच्छामि न करोमि वदामि वा ॥ चिंतयन्सर्वभूतस्थमात्मन्यपि च
केशवं ॥ शारीरं मानसं वा दुःखं दैवं भूतभवं तथा ॥ सर्वत्र शुभचित्तस्य तस्य मे जायते कुतः ॥ एवं
सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ॥ कर्तव्या पंडितैर्ज्ञात्वा सर्वभूतमयो हरिः ॥ साम चोपप्र
दानं च भेददंडौ तथा परौ ॥ उपायाः कथितास्ते तेमित्रादीनां च साधने ॥ तानेवाहं न पश्यामि
मित्रादींस्तात मा क्रुधः ॥ साध्याभावे महाबाहो साधनैः किं प्रयोजनं ॥ सर्वभूतात्मके तात ज
गन्नाथे जगन्मये ॥ परमात्मनि गोविंदे मित्रामित्रकथा कुतः ॥ जडानामविवेकानामशू
राणामपि प्रभो ॥ भाग्यभोग्यानि राज्यानि राज्यानि संत्यनीतिमतामपि ॥ तस्माद्यतेत पुण्ये
षु य इच्छेन्महतीं श्रियं ॥ यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥ देवा मनुष्याः पशवः राम
पक्षिवृक्षसरीसृपाः ॥ रूपमेतदनंतस्य विष्णोर्भिन्नमिव स्थितं ॥ एतद्विजानता सर्वं जग १२

त्स्थावरजंगमं ॥ द्रष्टव्यमात्मवद्विष्णुर्यतोयं विश्वरूपधृक् ॥ एवं ज्ञाते स भगवाननादिः पर
मेश्वरः ॥ प्रसीदत्यच्युतस्तस्मिन्प्रसन्ने क्लेशसंक्षयः ॥ शंकरहिरण्यगर्भौ हरेर्भिन्नाविति न मं
तव्यं ॥ विस्तारं एतं नु पश्यंति येमामित्यादि पूर्ववत् ॥ बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते
वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इत्यादिवचनेभ्यः ॥ हिंसादिरहितेन स्तुतिनमस्कारा
दि कर्तव्यमिति दर्शयितुं विष्णुश्चाहेन व्यास्याभिधीयत इति वा ॥ मत्कर्मकृन्मत्परमो मद्भ
क्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडवेति ॥ न चलति निजधर्मवर्णतो यः
सममतिरात्मसुहृद्विपक्षपक्षे ॥ न हरति न च हंति किंचिदुच्चैः सितमनसं तमवेहि विष्णुभ
क्तं ॥ विमलमतिरमत्सरः प्रशांतः शुचिचरितोऽखिलसत्त्वमित्रभूतः ॥ प्रियहितवचनोऽस्तमा
नमायो वसति सदा हृदि तस्य वासुदेवः ॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्व
रः स एकः ॥ इति मतिरमला भवत्यनंते हृदयगते व्रज तान्विहाय दूरात् ॥ यमनियमवि
धूतकल्मषाणामनुदिनमच्युतसक्तमानसानां ॥ अपगतमदमानमत्सराणां व्रज भट दूरत
रेण मानवानामित्यादिवचनैर्वस्तवल्लक्षणमेवं प्रकारस्याहिंसादिरहितेन विष्णोः स्तुति
नमस्कारादि कर्तव्यमिति श्रद्धयादेयं अश्रद्धयादेयं ॥ श्रद्धयाग्निः समिध्यत इत्यादिश्रुतेः ॥
श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥ अर्थावि

गो॰
वि॰ दी॰
१३

यं श्राद्धमधीनमव्रतमदक्षिणं यज्ञमन्दत्विजा हुतं ॥ अश्रद्धया यार्थदत्तमसंस्कृतं हविर्भागः
षडेते न व्रजेत्पसनम ॥ उत्पन्नमहे विष्णो यज्ञमङ्गक्रदे विष्णो तथा ॥ क्रयविक्रयसक्तानां पुण्य
यज्ञाग्निहोत्रिणां ॥ अश्रद्धया च यद्दत्तं जपनं दत्तं तथा ॥ तत्सर्वं तत्र देवेन्द्र मन्त्रसाद्भवि
ष्यति ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥ इत्या
दिस्मृतिभिश्चाश्रद्धया स्तुतिनमस्कारादिकर्तव्यं ॥ अश्रद्धया न कर्तव्यं ॥ ॐ तत्सदिति निर्दे
शो ब्रह्मणस्त्रिविधः स्मृत इति भगवद्वचनात् स्तुतिनमस्कारादिकं कर्म सात्विकं विगुणम
पि श्रद्धापूर्वकं ब्रह्मणोभिधानत्रयप्रयोगेण सगुणं सात्विकं संपादितं भवति ॥ आत्मानं वि
ष्णुं ध्यात्वा अर्चनस्तुतिनमस्कारादिकं कर्तव्यं ॥ नाविष्णुः कीर्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चये
त् ॥ नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयात् इति महाभारते कर्मकाण्डे ॥ सर्वाण्येता
नि नामानि परस्य ब्रह्मणोऽनघ ॥ सर्वान्कामानवाप्नोति समाराध्य जगद्गुरुं ॥ तन्मयेन हि गो
विन्दमित्येतद्वा लक्ष्यतान्यथा ॥ तन्मयो वाञ्छितान्कामान्सर्वान्प्राप्नोति मानव इति श्रीविष्णुधर्मे
सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्तमानोपि स योगी मयि वर्तते इति श्री
भगवद्गीतासु ॥ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातं ॥ ईदृङ्मनो यस्य राम
न तस्य भूयो भवोद्भवा द्वन्द्वगदा भवन्तीति विष्णुपुराणे ॥ गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते १३

छ्य

कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोन्यतः कस्माद्धुत्थैवाचार्यरूपेण स्वरूपेणावतिष्ठतीति
व्यासस्मृतेः ॥ वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः ॥ न शौरिचिन्ताविमुखजनसंवासवै
शसमिति कात्यायनवचनात् ॥ यत्र देशे वासुदेवनिन्दा तत्र वासो न कर्तव्यः ॥ एतद्भक्तिभवति
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्वे
ताश्वतरोपनिषन्मन्त्रवर्णात् ॥ ईश्वरे गुरौ परा भक्तिः कार्येति ॥ अवशेनापि यन्नाम्नि कीर्तिते स
र्वपातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥ ज्ञानतोऽज्ञानतो वापि वासुदेवस्य की
र्तनात् ॥ तत्सर्वं विलयं याति तोयस्थं लवणं यथा ॥ कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृ
णां ॥ प्रयाति विलयं सद्यः सकृद्यत्र च संस्मृते ॥ सकृत्स्मृतोपि गोविन्दो नृणां जन्मश
तैः कृतं ॥ पापराशिं दहत्याशु तूलराशिमिवानलः ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयं ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन
तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय इत्यादिवचनैः श्रद्धाभक्तिपार
भावेपि नामसंकीर्तनं समस्तदुरितनाशायमिति मन्तव्यं ॥ यद्धि मनसा ध्यायति तद्वाचाव
दतीति श्रुतिभ्यां स्मरणध्यानं च मानसं कीर्तनं तु नर्तनं नामशक्तिनान्यथावधारणं ॥ य
स्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिन्तने विघ्नो यत्र निवेशिते च मनसि ब्राह्मोपि

ॐ वि॰टी॰ १७ लोकोत्पत्तिकः॥ यक्किंचेत सियः स्थितो। मत्यपियांतु संप्रदानियमः किंचित्र येदवं श या
ति विलयं यत्राच्युतकीर्तिनः इति विष्णुपुराणे श्रीपराशरेणोपसंहृतं॥ आलोड्य सर्वशास्त्रा
णि विचार्य च पुनः पुनः॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदेति श्रीमहाभारते भगवता
श्रीवेदव्यासेनोपसंहृतं॥ हरिरेकः सदा ध्येयो भवद्भिः सत्वसंस्थितैः॥ ओमित्येवं सदा विप्राः
पठध्वं ध्यात केशवमिति हरिवंशे कैलासयात्रायां हरिरेको ध्यातव्य इत्युक्तं श्रीमहेश्वरेणा
पि॥ एतत्सर्वमभिप्रेत्य एष मे सर्वधर्माणां धर्मोधिकतमो मत इत्यादिकमुक्तं॥ किमेकं दैवतं
लोके किं वाप्येकं परायणं॥ यतः सर्वाणि भूतानीति यदुक्तं तं निर्दिश्य श्रीहेनोक्तमिति॥ व्या
ख्यातं॥ तत्किमित्याकांक्षायामाह विष्णुरिति स्वस्य ज्ञानेन तो नाम चिह्नं कृतं स्वल्पं विस्तारस्त
मतिं स्तुमतिं भजामह इत्यादि वाक्यैर्विस्तारो नाम संकीर्तनं सम्यक् ज्ञानशास्त्रे येभिहितं विष्णु
व्याप्यभिधायिनः स्वप्नस्य योतनस्य रूपं विष्णुरिति॥ व्याप्य मे रोदसी पार्थ कांतिश्चाभ्यधिका
स्थिता॥ क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः॥ विशतेः प्रवेशनस्य रूपं॥ येन वेविष्ट
तत्सर्वं व्याप्य नारायणः स्थित इति वा विष्णुरुक्तः॥ वषट्कारः यज्ञो वषट्कारादिवर्णात्म
नादेवान् प्रीणयतीति वा वषट्कारः॥ यज्ञापतिश्च वषट्कारश्चेति यस्मिन्यज्ञे वा वषट्क्रिया
यज्ञो वै विष्णुरिति श्रुतेः॥ देवतावा॥ भूतं च भव्यं च भवच्चेति भूतभव्यभवंति तेषां प्रभुः भूत राम १७

भव्यभवत्प्रभुः॥ कालभेदनाहृत्य सन्मात्रप्रतियोगिकमैकमैश्वर्यं तेनेति प्रभुत्वं रजोगुणमा
श्रित्य विरिंच्यादिरूपेण भूतानि करोतीति भूतकृत् कथ्यते हरिः॥ तमोगुणमधिष्ठाय रुद्रा
त्मना भूतानि कृंतति कृणोति हिनस्ति इति वा भूतकृत् ज्ञेय॥ सत्वगुणमधिष्ठाय रुद्रात्मना भूता
नि कृंतति कृणोति हिनस्ति इति वा भूतकृत् ज्ञेय॥ सत्वगुणमधिष्ठाय भूतानि बिभर्ति पालय

भूतभव्यभवत्प्रभुः॥ भूतकृद्भूतभृद्भावो भूतात्मा भूत
भावनः॥ १४॥

ति धारयति पोषयति॥ इति वा भूतभृत् प्रपंचरूपीण भवतीति केवलं भवत्येव वा भावः भवनं
भावः॥ सत्तात्मको वा॥ सत्वात्मको भूतात्मा अंतर्यामीति वा॥ भूतात्मा भूतानामात्मा अंतर्यामीति श्रु
तेः॥ भूतानि भावयति इति भूतभावनः वर्द्धयतीति वा॥ १४॥ भूतभावनादिभिः गुणैर्नंतत्वं

ॐ
वि॰ टी॰
२५

शरीरं प्रतिविशिष्यते ॥ पूतात्मेति ॥ पूत आत्मा यस्य स पूतात्मा केवलो निर्गुण इति श्रुतेः ॥ गुणोप
रागः स्वेच्छातः पुरुषस्येति कल्पनो परमश्चासावात्मा चेति परमात्मा कार्यकारणविलक्षणो नि
त्यशुद्धबुद्धमुक्तस्वभावः मुक्तानां परमा प्रकृष्टा गतिः गन्तव्या देवता पुनरावृत्त्यसंभवात् तद्गतस्येति
मुक्तानां परमा गतिः ॥ मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यत इति भगवद्वचनात् ॥ न व्येति ॥ नास्य व्य
यो विकारो वा विद्यत इत्यव्ययः ॥ अजरोऽमरोऽव्यय इत्यादिश्रुतेः ॥ पुरत्वात्पुरादरयोगिन आसी
न्नु पूर्वमेवेति विग्रहं कृत्वा पृषोदरादित्वात् पुरुषः पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वमि

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥ अव्ययः पुरुषः साक्षी क्षेत्र
ज्ञोऽक्षर एव च ॥ १५ ॥

मितिश्रुतेः ॥ पूर्णपुरी पुरुत्कर्षशालिषु सत्त्वेषु प्रसीदतीति पुरू
णि फलानि सनोति राति ददाति ॥ पूर्णानि भुवनानि संहारसमये सातिं तं करोतीति वा पुर
णात्सदनाच्च पुरुषः ॥ नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितं ॥ व्याप्य शेते महात्मा यस्तस्मात्पु
रुष उच्यत इति महाभारते ॥ पूरणात्सदनाच्चैव ततोऽसौ पुरुषोत्तम इति पंचमे वेदे ॥ साक्षादव्यवधा
नेन स्वरूपबोधेन पश्यति सर्वमिति साक्षी साक्षाद्द्रष्टरि संज्ञायामिति श्रीपाणिनेर्वचनात् ॥ क्षेत्र

राम
२५

ज्ञं चापि मां विद्धीति भगवद्वचनात् स एव न क्षरतीति अश्नोतेर्वा सरप्रत्ययान्तस्य रूपमक्षर इति ॥ ए
वकारात् क्षेत्रज्ञाक्षरयोरभेदः परमार्थतः ॥ तत्त्वमस्यादिश्रुतेः ॥ चकाराद्व्यावहारिको भेदः ॥ प्रसिद्धेर
प्रमाणत्वात् ॥ १५ ॥ ज्ञानेन्द्रियाणि सर्वाणि निरुध्य मनसा सह ॥ एकत्वभावना योगः क्षेत्रज्ञपरमा
त्मनोः ॥ तदवाप्यतया योगः ॥ योगं विदन्तीति योगविदः तेषां नेता ॥ ज्ञानिनां योगक्षेमवहना
दिना योगविदां नेता ॥ प्रधानं प्रकृतिर्माया पुरुषो जीवस्तयोरीश्वरः प्रधानपुरुषेश्वरः ॥ नरस्याव
यवाः सिंहस्यावयवाश्च यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य स नरसिंहवपुः ॥ यस्य वक्षसि नित्यं वसती

योगो योगविदां नेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान्केशवः पु
रुषोत्तमः ॥ १६ ॥

ति श्रीः स श्रीमान् ॥ अभिरूपाः केशा यस्य स केशवः केशाद्वोऽन्यतरस्या
मिति वप्रत्ययः प्रशंसायां ॥ कश्च अश्च ईशश्च केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते स वा केशवः ॥ क
श्च ईशश्च केशौ तौ वशयतीति वा केशवः ॥ केशिवधाद्वा केशवः ॥ यस्मात्त्वयैव दुष्टात्मा हतः के
शी जनार्दन ॥ तस्मात्केशवनाम्ना त्वं लोके गेयो भविष्यसीति विष्णुपुराणे ॥ पृषोदरादित्वाद्रूपसा
धकत्वकल्पना पुरुषाणामुत्तमः ॥ अत्र न निर्धारण इति षष्ठीसमासप्रतिषेधो न भवति जात्यादिनि
पेक्षायां सामर्थ्यात् ॥ यत्र पुनर्जातिगुणक्रियापेक्षया पृथक्क्रियते तत्रासामर्थ्यान्निषेधः
लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १६ ॥

श्री
वि॰टी॰
१९

प्रसन्नस्तु तत्क्षणादेव सर्वं स्वप्रभवाप्ययान्॥ सर्वस्य सर्वदा ज्ञानात्सर्वमेनं प्रचक्षत इति भगवद्व्यास
वचनात्॥ सर्वः॥ शृणाति संकुलाः प्रजाः संहरति संहारसमये इति वा शर्वः॥ निस्त्रैगुण्यतया शुद्धत्वा
च्छिवः॥ स एव ब्रह्म स शिव इत्यभेदोपदेशात् शिवादिनामभिर्हरिरेव स्तूयते॥ स्थिरत्वात्स्थाणुः॥ भू
तानामादिकारणत्वेन भूतादिः॥ प्रलयकाले अस्मिन्सर्वं निधीयत इति निधिः॥ कर्मण्यधिकरणे
चेति किः प्रत्ययः सप्तनिधिर्विशिष्यते॥ अव्ययः॥ अविनाशी निधिरित्यर्थः॥ स्वेच्छया संभवी

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः॥ संभवो भावनो भर्ता प्र
भवः प्रभुरीश्वरः॥ २७॥

नं भवनं यस्य स संभवः॥ धर्मसंस्थापनार्थाय संभवामि यु
गे युगे इति भगवद्वचनात्॥ सर्वेषां भोक्तॄणां फलानि भावयतीति भावनः॥ सर्वफलदातृ
त्वं फलमत उपपत्तेरिति सूत्रे प्रतिपादितं॥ प्रपंचस्याधिष्ठानत्वेन भरणाद्भर्ता॥ प्रकर्षेण मह
भूतान्यस्माज्जायन्त इति प्रभवः॥ प्रकृष्टो भवो जन्मास्येति वा प्रभवः॥ सर्वासु क्रियासु सामर्थ्या
तिशयात्प्रभुः॥ निरुपाधिकमैश्वर्यं यस्य स ईश्वरः॥ एष सर्वेश्वर इति श्रुतेः॥ २७ ॥ २७ राम
१९

स्वयमेव भवतीति भवः॥ न परो नभावयतीति स्वयंभूः॥ स एव सृष्ट्यादौ ह्यभवदिति मान्त्रवर्णिकं वचः॥
सर्वेषामुपरि भवति यश्चोपरि भवति स स्वयमेव भवतीति वा स्वयंभूः॥ परिभूः स्वयंभूरिति म
न्त्रवर्णात्॥ अथवा स्वयंभूः परमेश्वरः स्वयमेव स्वतन्त्रो भवति सर्वदा न परतन्त्र इति॥ परांचि
खानि व्यतृणत्स्वयंभूरिति मन्त्रवर्णात्॥ शं सुखं भक्तानां भावयतीति शंभुः॥ आदित्यमंडला
न्तःस्थो हिरण्मयः पुरुषः द्वादशादित्येषु विष्णुः॥ आदित्यानामहं विष्णुरिति स्मृतेः॥ अदिते
रखंडिताया मह्याः पतिरिति वा आदित्यः॥ मही देवी विष्णुपत्नीति श्रुतेः॥ यथादा
दित्य एक एव भिन्नेषु जलभाजनेषु भिन्नवत् निभासते एवमनेकशरीरेष्वेक एवात्मा भि

स्वयंभूः शंभुरादित्यः पुष्कराक्षो महास्वनः॥ अनादिनिधनो धाता विधाता धात
रुत्तमः॥ २८॥

न्नवत्प्रतिभासत इत्यादित्यसाम्यादादित्यः॥ पुष्करेणोपमिते अक्षिणी य
स्य सः पुष्कराक्षः॥ महान्नूर्जितः स्वनो नादः श्रुतिलक्षणो वा यस्य स महास्वनः॥ महदित्या
दिना समाकृते इत्याह महतः समानाधिकरणजातीययोरिति॥ अस्य महतो भूतस्य निश्व
सितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इति श्रुतेः॥ आदिर्जन्म निधनं विनाशः द्वयं यस्य न वि
द्यते सोऽनादिनिधनः॥ अनन्तादिरूपेण विश्वं बिभर्तीति धाता कर्मणां तत्फलानां च कर्ता
विधाता॥ अनन्तादीन्धारकान् विशेषेण दधातीति विधाता॥ धातुरुत्तम इति नामैकस

कृष्ट इति नामद्वयं वा॥ कार्यकारणप्रपंचधारणाद्वि
सेवधातुर्धातुरुत्कृष्टः॥ सर्वेषामुत्कृष्टानामतिशयेन

विशेषणं सामानाधिकरण्येन सर्वधातृभ्यः पृथिव्या
दिभ्यः उत्कृष्टं विधातारित्यर्थः॥ धातोर्विरिंचादुत्त

उद्गनन्वाद्युत्तमः॥ २८॥

शब्दादिरहितत्वान्न प्रत्यक्षादिगम्यः नाप्यनुमानविषयः तद्व्याप्तलिङ्गाभावात् ॥ नाप्युपमा नसिद्धो निर्भागत्वेन सादृश्याभावात् ॥ नाप्यर्थापत्तिग्राह्यः तद्विनानुपपद्यमानस्यासंभवा त् ॥ नाप्यभावगोचरो भावरूपत्वात् अभावसाक्षित्वाच्च षष्ठप्रमाणस्य ॥ नापि शास्त्रप्रमाण मेयः ॥ प्रमाणजन्यातिशयाभावात् यद्येवं शास्त्रयोनित्वं कथं उच्यते प्रमाणादिसाक्षित्वेन प्र काशरूपस्य प्रमाणाविषयत्वे सिद्धे अध्यस्तातद्रूपकत्वेन शास्त्रप्रमाणकत्वमित्यप्रमेयः ॥ हृषी काणि इंद्रियाणि तेषामीशः क्षेत्रज्ञरूपभाक् यद्वा इंद्रियाणि यस्य वशे वर्त्तंते स परमात्मा यस्य वा सूर्यरूपस्य चंद्ररूपस्य जगत्प्रीतिकरा हृषीकेशाः केशाः रश्मयः स हृषीकेशः हृषोहरत्वात्

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थ

विरो ध्रुवः ॥१९॥ साधुत्वं ॥ तथा चोक्तं मोक्षधर्मे सूर्याचंद्रमसोः शश्वत्तंशुभिः केश संज्ञितैः ॥ बोधयं स्वापयंश्चैव जगदुद्भिष्ठते पृथक् ॥ बोधनात्स्वापनाच्चैव जगतो हर्षणं भवे त् ॥ अग्नीषोमकृतैरेवं कर्मभिः पांडुनंदन ॥ हृषीकेशोऽहमीशानो वरदो लोकभावन इति ॥ स र्वजगत्कारणपद्मं नाभौ यस्य स पद्मनाभः ॥ अजस्य नाभावध्येकमर्पितमिति श्रुतेः ॥ अमरा णां प्रभुः अमरप्रभुः ॥ विश्वं कर्म क्रियायस्य क्रियत इति जगत्कर्म विश्वकर्म यस्येति वा वि चित्रनिर्माणशक्तिमत्त्वाद्विश्वकर्मेणा त्वष्ट्रा सादृश्यत्वाद्वा विश्वकर्मा ॥ मननान्मनुः ॥ नान्यो तो

[illegible] नोऽतो वास्य विरत्वान्ध्रुवः स्थाविरो ध्रुव इति एकमिदं नामस्त विशेषणं ॥१९॥

वंभूतनन्दकारणेन त्वष्टा ॥ अतिशयेन स्थूलः स्थविष्ठः पुराणः स्थविरः एव

गो॰ वि॰टी॰ ८

कर्मेंद्रियैर्न गृह्यत इति अग्राह्यः ॥ यतो वाचो निवर्त्तंते अप्राप्य मनसा सहेति श्रुतेः ॥ सर्वेषु का लेषु भवतीति शाश्वतः ॥ शाश्वतं शिवमच्युतमिति श्रुतेः ॥ कृषिर्भूवाचकः शब्दो नश्च निर्वृति वाचकः ॥ विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वत इति व्यासवचनात् ॥ सदानंदाकः कृष्णः कृष्णो वर्णो हि मे यस्मात्कृष्णोऽहमर्जुनेति वा कृष्णः ॥ लोहिते अक्षिणी यस्य स लोहिताक्षः ॥ प्र मातृष्वभो लोहिताक्ष इति मंत्रवर्णात् ॥ प्रलये भूतानि हिनस्तीति प्रतर्दनः ॥ ज्ञानैश्वर्यादि

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ॥ प्रभूतस्त्रिककुद्धाम पवित्रं मंगलं परं ॥२०॥ रामायनमः ॥

गुणैः संपन्नः प्रभूतः ॥ ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभामपि धामेति त्रिककुद्धाम ॥ पे न पुनाति येन वा ऋषिर्देवता वा पुनाति तत्पवित्रं ॥ युवस्य स्तायाः कर्तरि चर्षिदेवतयोरि ति पाणिनिस्मरणात् इत्रप्रत्ययः ॥ अशुभानि निराचष्टे तनोति शुभसंततिं ॥ स्मृतिमात्रे ण यत्पुंसां ब्रह्म तन्मंगलं विदुरिति वैष्णवोत्तराणे ॥ कल्याणरूपत्वाद्धा मंगलं सर्वभूतेभ्यो उ

॥२०॥

गें
वि॰टी॰
१७

सर्वभूतानांनियंतृत्वादीशानः प्राणान्ददातिचेष्टयतीतिप्राणदः कोह्येवान्यात्कः प्राण्यादि
तिश्रुतेः ॥ यद्वाप्राणान्कालात्मनाद्यतिखंडयतीतिवाप्राणदः ॥ प्राणान्दापयतिशोधयतीति
वानीतिवाप्राणदः ॥ प्राणितीतिप्राणः क्षेत्रज्ञः परमात्मावा ॥ प्राणस्यप्राणमितिश्रुतेर्मुख्यप्राणो
वा ॥ वृद्धतमोज्येष्ठः ज्यचेत्यधिकारेवृद्धस्यचेतिवृद्धशब्दस्यज्यादेशविधानात् ॥ प्रशस्यस्यश्रइतिश्रा
देशविधानात् ॥ प्राणोज्येष्ठश्चश्रेष्ठश्चेतिश्रुतेः ॥ मुख्यप्राणोज्येष्ठश्चेत्यधिकरणसिद्धत्वात्सर्वकारण
त्वाज्ज्येष्ठः ॥ सर्वानतिशयत्वाद्वाश्रेष्ठः ईश्वरत्वेनसर्वासांप्रजानांपतिः प्रजापतिः हिरण्मयांडांतर्व

ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्रजापतिः ॥ हिरण्यगर्भोभूगर्भोमाधवोम
धुसूदनः ॥ २१ ॥

र्तित्वाद्धिरण्यगर्भः ॥ विरंच्यात्मनावाहिरण्यगर्भः हिरण्यगर्भःसमवर्त्ततांग्रेभूतस्यजातःपति
रेकआसीदितिमंत्रवर्णात् ॥ भूगर्भोऽस्यसभूगर्भः मायायाःश्रियोधवःपतिर्माधवः ॥ मधुविद्या
वबोध्यत्वाद्वामाधवः ॥ मौनाद्ध्यानाच्चयोगाच्चविद्धिभारतमाधवमितिश्रीव्यासवचनाद्वामाध
वः ॥ मधुनामानंदैत्यंसूदितवानितिमधुसूदनः ॥ कर्णमूलमित्योद्भवंचमधुनाममहासुरंब्रह्म
णोपचितिंकुर्वन्जघानपुरुषोत्तमः ॥ तस्यतातवधादेवदेवदानवमानवाः ॥ मधुसूदनइत्याहुर्ऋषि

॥ २१ ॥

राम
१८

सर्वशक्तितयाईश्वरः ॥ विक्रमःपेश्वर्यंतेनयोगाद्विक्रमी धनुरस्यास्तीतिधन्वी व्रीह्यादित्वादिनिः
रामःशस्त्रभृतामहमितिभगवद्वचनात् ॥ मेधाबहुग्रंथावधारणसामर्थ्यंसायस्यास्तीतिमेधा
वी ॥ अस्मायामायामेधास्रजोविनिरितिपाणिनिवचनाद्विनिप्रत्ययः विचक्रमेजगद्विश्वंतेनेतिवि
क्रमः ॥ विनागरुडेनपक्षिणाक्रमणाद्वाविक्रमः ॥ क्रमणात्क्रमहेतुत्वाद्वाक्रमः ॥ क्रांतेर्विष्णुरि

ईश्वरोविक्रमीधन्वीमेधावीविक्रमःक्रमः ॥ अनुत्तमोदुराधर्षःकृतज्ञः
कृतिरात्मवान् ॥ २२ ॥

तिमनुवचनात् ॥ अविद्यमानउत्तमोयस्मात्सोऽनुत्तमः ॥ यस्मात्परंनापरमस्तीतिश्रुतेः
नत्वत्समोऽस्त्यभ्यधिकःकुतोन्यइतिस्मृतेश्च दैत्यादिभिर्धर्षयितुमशक्यइतिदुराधर्षः ॥ प्राणि
नांपुण्यापुण्यात्मकंकर्मजानातीतिकृतज्ञः ॥ पत्रपुष्पादिकंस्वल्पमपिप्रयच्छतोमोक्षंददातीति
वाकृतज्ञः पुरुषप्रयत्नःकृतिः क्रियावाकृतिःसर्वात्मकत्वात्क्रियाधारत्वेनलक्ष्यते ॥ कृ
तौनिवाकृतिः ॥ स्वमहिमप्रतिष्ठत्वादात्मवान् ॥ सभगवः ॥ कस्मिन्प्रतिष्ठितइतिस्वेमहि

॥ २२ ॥

ॐ
वि॰ टी॰
२५

सुराणां देवादीनामीशः॥ आर्त्तानामार्त्तिहरत्वाच्छरणं॥ शर्म परमानंदरूपत्वात्॥ विश्वस्य कारणत्वा
द्विश्वरेताः॥ सर्वाः प्रजाः यस्मात्प्रादुर्भवंतीति प्रजाभवः॥ प्रकाशरूपत्वादहः॥ कालात्मना स्थि
तो विष्णुः संवत्सर इत्युक्तः॥ व्यालवद्ग्रहीतुमशक्यत्वाद्व्यालः॥ प्रतीतिः प्रज्ञेति प्रत्ययः प्र
ज्ञानं ब्रह्मेति श्रुतेः॥ सर्वदर्शनात्मकानि अक्षीणि यस्य सः सर्वदर्शनः॥२३॥ न हि जातो न जाये
ऽहं न जनिष्ये कदाचन॥ क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृत इति महाभारते॥ सर्वेषामीश्वराणा
मीश्वरत्वात्सर्वेश्वरः॥ एष सर्वेश्वर इति श्रुतेः॥ नित्यनिष्पन्नरूपत्वात्सिद्धः॥ सर्ववस्तुषु संविद्रूपत्वा

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः॥२३॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः॥ वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥२४॥

त्सिद्धिः॥ निरतिशयत्वाद्वा सिद्धिः॥ स्वर्गादीनां विनाशित्वात्
अफलत्वं॥ सर्वभूतानां कारणत्वात्सर्वादिः॥ स्वरूपसामर्थ्यान्न च्यवते सोऽच्युतः॥ शाश्वतं शिवम
च्युतमिति श्रुतेः॥ तथा भगवद्वचनं॥ यस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा॥ इति नाम्नामाद्यं
शतं॥ वर्षणात्सर्वकामानां धर्मो वृषः कात्तोयाद्भूमिमपादिति कपिर्वराहः॥ वृषत्वात्कपि
त्वाच्च वृषाकपिः वराहः॥ श्रेष्ठश्च धर्मश्च वृष उच्यते॥ तस्माद्वृषाकपिः प्राह कश्यपो मां प्रजापति
रिति व्यासवचनं॥ इयानिति मातुं परिच्छेत्तुं न शक्यते आत्मा अस्येति अमेयात्मा॥ सर्वबंधविनिर्गतः

श्रुतेः नानाशास्त्रोक्तयोगादवगतत्वात्सर्वयोगविनिस्सृतः॥२४॥

सर्वयोगविनिस्सृतः॥ युक्तो योगज्ञैरुपासत इति

राम
२५

वसंति सर्वभूतान्यत्र तेष्वयमपि वसतीति वसुः॥ वसूनामस्मि पावकश्चास्मीति वचनाद्वा वसुः॥ वसुशब्देन ध
नवाचिना प्रशस्तं लक्ष्यते॥ प्रशस्तं मनो यस्य स वसुमनाः॥ रागद्वेषादिभिः क्लेशैर्मदादिभिरुपक्ले
शैश्चायतनेन कलुषितं चित्तं न तस्य मनः प्रशस्तं॥ अवितथरूपत्वात्परमात्मा सत्यः॥ सत्यं ज्ञानमनं
तमिति श्रुतेः॥ मूर्त्तामूर्त्तात्मकत्वाद्वा सच्च त्यच्चाभवदिति श्रुतेः॥ सदिति प्राणास्तीत्यन्नं यमिति दि
वाकरः तेन सत्यं प्राणान्नादित्यरूपत्वाद्वा सत्यमिति प्राणानीति त्रयमिति सावादित्य इति श्रुतेः

वसुर्वसुमनाः सत्यः समात्मा संमितः समः॥ अमोघः पुंडरीकाक्षो वृषकर्मा वृषाकृतिः॥२५॥

समश्चात्मा वा समात्मा॥ समश्चात्मेति विद्यादिति श्रुतेः॥ सर्वैरर्थजातैः प
रिच्छिन्नो मितः संमितः॥ सर्वकालेषु सर्वविकाररहितत्वात्समः॥ यया लक्ष्म्या सह वर्त्तते इति स
मः॥ पूजितः स्तुतः संस्मृतो वा सर्वं फलं ददाति न वृथा करोतीति अमोघः॥ अवितथसंकल्पा
द्वा सत्यसंकल्प इति श्रुतेः॥ हृदयाख्यं पुंडरीकमश्नुते व्याप्नोति तत्रोपलक्ष्यत इति पुंडरीका
क्षः॥ दहरं पुंडरीकं वेश्म मध्यं स्यास्मिन्निति श्रुतेः॥ अक्षिणी पुंडरीकसंकाशे यस्येति वा॥ धर्मल
क्षणं कार्यमस्येति वृषकर्मा॥ धर्मार्थमाकृतिर्यस्य स वृषाकृतिः॥ धर्मसंस्थापनार्थाय संभ

गवद्वचनं॥२५॥

संहारकाले प्रजाः संहरन्नरोदयतीति रुद्रः ॥ रुदं राति ददातीति वा रुद्रः ॥ रुत् दुःखं दुःखकार
णं वा द्रावयतीति वा रुद्र इत्युच्यते ॥ तस्माच्छिवः परकारणमिति लिंगपुराणवचनात् ॥ बहू
नि शिरांसि अस्येति बहुशिराः ॥ सहस्रशीर्षा पुरुष इति श्रुतिवचनात् ॥ बिभर्त्ति लोकानि
ति बभ्रुः ॥ विश्वकारणत्वेन विश्वयोनिः ॥ शुचीनि श्रवांसि नामानि श्रवणीयान्यस्येति शुचि

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ २९
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥

श्रवाः ॥ न विद्यते मृतं मरणमस्येति अमृतः ॥ अमृतरोः मृत इति श्रुतेः ॥ शाश्वतश्चासौ स्थाणुश्चे
ति शाश्वतस्थाणुः ॥ वर आरोहो क्रोडमस्येति वरारोहः ॥ वरमारोहणमस्मिन्निति वा ॥ आरूढा
नां पुनरावृत्त्यसंभवात् ॥ न च पुनरावर्त्तत इति श्रुतेः ॥ यं प्राप्य न निवर्त्तन्ते तद्धाम परमं ममेति भ

सर्वत्र गच्छतीति सर्वगः ॥ कारणत्वेन व्याप्तत्वात् सर्वत्र सर्वं वेत्ति विंदते इति वा सर्ववित् ॥ भाती
ति भानुः तमेव भान्तमनुभाति सर्वं ॥ तस्य भासा सर्वमिदं विभातीति श्रुतेः ॥ यदादित्यगतं तेज इत्या
दिस्मृतेश्च ॥ सर्वविच्चासौ भानुश्च सर्वविद्भानुः ॥ विष्वक् अंचते पलायते दैत्यसेना यस्य रणोद्यो
गमात्रेण स विष्वक्सेनः ॥ जनान् दुर्जनानर्दयतीति दुर्गतीन् हिनस्ति नरकादीनामयतीति
वा जनैः पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं याच्यत इति वा जनार्दनः ॥ वेदयतीति वेदः ॥ तथा

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ॥ वे
दो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ २७ ॥

मेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति भगवद्वच
नात् ॥ सर्वे वेदाः सर्वविद्याः सशास्त्राः सर्वे यज्ञाः सर्वे हुत्यास्तु कृष्णः ॥ विदुः कृष्णं ब्राह्मणास्त
त्त्वतो ये तेषां राजन् सर्वयज्ञाः समाप्ताः ॥ इति श्रीमहाभारते ॥ अव्यंगो ज्ञानादिभिः परिपूर्णः ॥ वि
कल उच्यते व्यंगो व्यक्तिर्न विद्यते इति अव्यंगो वा ॥ अहमेव वेद्यमिति भगवद्वचनात् ॥ वेदाः अंगभू
तायस्य स वेदांगः ॥ वेदान् विचारयतीति वेदवित् ॥ क्रांतदर्शी कविः सर्वदृक् नान्योऽतोस्ति द्रष्टेत्या

श्री
वि॰ टी॰
२१

लोकेनध्यक्षतीति लोकाध्यक्षः ॥ सर्वेषां लोकानां प्राधान्येनाक्षः द्रष्टा लोकपालादि सुराणामध्यक्षः सुराध्यक्षः धर्माधर्मौ साक्षादीक्षते अनुरूपफलदानं तस्माद्धर्माध्यक्षः ॥ कृतं स्वकार्यरूपेणाकृतः कारणरूपेणेति कृताकृतः ॥ सर्गादिषु पृथग्विभूतयश्चतस्रः संन्यस्ता अस्येति चतुरात्मा ॥ ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ॥ विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥ विष्णुर्मन्वादयः का

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २६ ॥

लः सर्वभूतानि च द्विज ॥ स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥ रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः ॥ चतुर्धा प्रलयायैता जनार्दनविभूतयः इति श्रीविष्णुपुराणे ॥ व्यूहात्मा चं चतुर्धावयवा वासुदेवादि मूर्तिभिः ॥ सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्मा जनार्दन इति व्यासवचनाच्चतुर्व्यूहः ॥ दंष्ट्राश्चतस्रो यस्येति चतुर्दंष्ट्रः ॥ नृसिंहविग्रहः साहस्रपाठः ॥ शृंगं वा दंष्ट्रेत्यु

चाते ॥ चत्वारि शृंगा इति श्रुतेः ॥ चत्वा

राम
२१

प्रकाशैककरत्वाद्भ्राजिष्णुः ॥ भोग्यरूपतया प्रकृतिर्मायाभोजनमुच्यते ॥ पुरुषरूपेण भोक्तेति भोक्ता ॥ हिरण्याक्षादीन्सहते ऽभिभवतीति सहिष्णुः ॥ हिरण्यगर्भरूपेण जगदादावुत्पद्यत इति स्वयमपि जगदादिजः ॥ न विद्यते अघमस्येत्यनघः ॥ अपहतपाप्मेति श्रुतेः ॥ विजयते ज्ञानैश्वर्यादिभिर्गुणैर्विश्वमिति विजयः ॥ यतो निशायने सर्वभूतानि स्वभावेनो जेता विश्वस्रष्टा सोयोनि स्वयं विश्वयोनिः ॥ पुनः पुनः शरीरेषु वसति तेन च रूपेणेति पुनर्वसुः ॥ २९ ॥ इंद्रमुपगतोऽनुजत्वेनेत्युपेंद्रः ॥ ममोपरि यथेंद्रस्त्वं स्थापितो गोभिरीश्वरः उपेंद्र इति कृष्ण त्वां गायंति भुवि देवताः इति श्रीहरिवंशवचनात् ॥ यद्वा उपरि इंद्रः ॥ बलिवामनरूपे

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९ ॥ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ॥ अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ ३० ॥

तया चितवानिति वामनः मध्ये वामनमासीनं विश्वेदेवा उपासत इति मंत्रवर्णात् ॥ स एव जगत्त्रयं क्रममाणः प्रांशुरभवदिति प्रांशुः ॥ तोये तु पतिते हस्ते वामनोऽभूदवामनः ॥ सर्वदेवमयं रूपं दर्शयामास वै विभुः ॥ भूः पादौ द्यौः शिरश्चास्य चंद्रादित्यौ च चक्षुषी इत्यादि विश्वरूपं दर्शयित्वा तस्य विक्रमतो भूमिं चंद्रादित्यौ स्तनांतरे ॥ नभश्च क्रममाणस्य जानुदेशे व्यवस्थितौ ॥ इत्यादि प्रांशुत्वं दर्शयति श्रीहरिवंशे ॥ नमोघं चेष्टितं यस्य सऽमोघः ॥ स्मरणस्तवनार्चनपूजनादिना पावनत्वाच्छुचिः ॥ प्राणबलसम्पन्नत्वादूर्जितः ॥ सहो

नियमः ॥ स्वेन यंक्षनीति यमः ॥ ३० ॥

कुरिति मंत्रवर्णात् ॥ बलप्रकाशशालित्वादूर्जितः ॥ प्रतीतो इंद्रि
... ॥ सर्वेषां प्रति संग्रहात्

निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यः ॥ सर्वविद्यानां वेदितृत्वाद्वैद्यः ॥ सदाविर्भूतस्वरूपत्वात्सदायोगी ॥ धर्म
त्राणाय असुरवीरान्हंतीति वीरहा ॥ मायाविद्यायाः पतिर्माधवः ॥ मा विद्या च हरेः प्रोक्ता तस्या ईशो य
तो भवान् ॥ तस्मान्माधवनामासि धवः स्वामीति शब्दित इति श्रीहरिवंशे ॥ यथा मधु परां प्रीतिमुत्पाद
यत्येवमयमपीति मधुः ॥ इंद्रियाणामविषयत्वात् अशब्दमस्पर्शमित्यादिश्रुतेः ॥ शब्दरहितत्वादतींद्रि
यः ॥ मायाविनामपि मायाकारित्वान्महामायः ॥ मम माया दुरत्ययेति भगवद्गीतत्वात् जगदुत्पत्ति
स्थितिप्रलयकरणउद्युक्तत्वान्महोत्साहः ॥ बलिनामपि बलवत्त्वान्महाबलः ॥ ३४ ॥ बुद्धिमताम

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महा
बलः ॥ ३४ ॥ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्
मा महाद्रिधृक् ॥ ३५ ॥

पि बुद्धिमत्वान्महाबुद्धिः ॥ महदुत्पत्तिकारणं अविद्यालक्षणं वीर्यमस्येति महावीर्यः ॥ महती
शक्तिः सामर्थ्यमस्येति महाशक्तिः ॥ महती द्युतिर्बाह्याभ्यंतरस्येति महाद्युतिः ॥ स्वयंज्योतिश्श्रु
तेः ॥ ज्योतिषां ज्योतिरित्यादिश्रुतेः ॥ इदं तदित्यनिर्देष्टुं न शक्यते परस्य स्वयंवेद्यत्वात्ततश्चा
निर्देश्यं वपुरस्येति अनिर्देश्यवपुः ॥ ऐश्वर्यलक्षणा समग्रा श्रीर्यस्य स श्रीमान् ॥ सर्वैः प्राणि
भिरमेया बुद्धिरात्मा यस्य सोऽमेयात्मा ॥ महान्तमद्रिं मंदरं गोवर्धनममृतमंथने गोरक्षणे च धृतवा

महानिष्वसइभृतेपो यस्य स महेष्वासः ॥ एकार्णवाप्लुतां देवीं महीं बभारेति महीभर्ता ॥ य
स्य वक्षस्यनपायिनी श्रीर्वसतीति सः सतां वैदिकानां साधूनां पुरुषार्थसाधनप्राप्तिहेतुः स
तां गतिः ॥ न केनापि प्रादुर्भावेषु निरुद्ध इति निरुद्धः ॥ सुरानंदयतीति सुरानंदः ॥ नष्टां वै ध
रणीं पूर्वमविंदं यद्गुहागतां ॥ गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुतः ॥ इति मोक्षधर्मवचना

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ॥ अनिरुद्धः सुरानंदो गोविंदो गो
विदांपतिः ॥ ३६ ॥ ॥ ॥ श्रीरामोजयति ॥

त् ॥ गोविंदः अहं किलेंद्रो देवानां त्वं गवामिंद्रतां गतः ॥ गोविंद इति लोकास्त्वां स्तोष्यंति भुवि शा
नमिति ॥ गौरेषा भवता वाणी तां च वेदयते भवान् ॥ गोविंदस्तु ततो देवमुनिभिः कथ्यते भवानिति
हरिवंशे ॥ गौर्वाणी तां विंदतीति गोविंदः ॥ तेषां पतिर्विशेषेणेति गोविदांपतिः ॥ ३६ ॥ ॥

ॐ वि॰टी॰ २३

तेजस्विनामपितेजस्वित्वान्मरीचिः॥ तेजस्तेजस्विनामिति भगवद्वचनात्॥ स्वाधिकारात्प्रमाद्य
मानांनीः प्रजा दमयितुं शीलमस्येति वैवस्वतादिरूपेण इति दमनः॥ अहं स इति तादात्म्यभावितः
संसारभयं जहातीति हंसः॥ पृषोदरादित्वात्साधुत्वं॥ हंति गच्छतीति सर्वेषु देहेषु सर्वशरीरे
ष्विति वा हंसः॥ हंसः शुचिषदिति मंत्रवर्णात्॥ शोभनपतनत्वात्सुपर्णः॥ द्वा सुपर्णा सयुजे

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः॥ हिरण्यनाभः सुतपाः पद्मनाभः प्र
जापतिः॥ ३७॥ ॥ रामेति॥

॥ श्री ॥ रामजी

ति मंत्रवर्णात्॥ भुजंगानामुत्तमो भुजगोत्तमः॥ हिरण्यमिव कल्याणनाभिरस्येति हिरण्यना
नाभित्वाद्धिरण्यनाभः॥ बदरिकाश्रमे नरनारायणस्वरूपेण शोभनं तपश्चरतीति सुतपाः॥
मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति मंत्रवर्णात्॥ पद्ममिव सुवर्तुला नाभिरस्येति पद्म
यद्वा पद्मस्य नाभौ मध्ये प्रकाशनाद्वा पद्मनाभः॥ पृषोदरादित्वात्साधुत्वकल्पना॥ प्रजानां पतिः प्र

राम २३

मृत्युर्विनाशस्तद्धेतुर्वा यस्य न विद्यते स अमृत्युः॥ प्राणिनां कृताकृतं सर्वं पश्यतीति स्वाभाविकेन बोधेनेति सर्व
दृक्॥ हिनस्तीति स्मरणमात्रेण समस्तपापानीति सिंहः॥ नाम्नां द्वितीयं शतं विवृतमिति॥ २००॥ कर्मफलं पु
रुषान्संधत्त इति संधाता॥ फलभोक्ता च स एवेति संधिमान्॥ सदैकरूपत्वात्स्थिरः॥ अजति गच्छति क्षप
तीति वा अजः॥ मर्षितुं दानवादिभिर्न शक्यत इति दुर्मर्षणः॥ शास्ति श्रुत्यादिभिः सर्वेषामनुशिष्टिं
करोतीति शास्ता॥ विशेषेण श्रुतो येन सत्यज्ञानादिलक्षणः स्वात्मा विश्रुतात्मा॥ सुरारीणां नि
हंतृत्वात्सुरारिहा॥ ३८॥ समस्तविद्यानामुपदेष्टृत्वात्सर्वेषां जनकत्वाद्वा गुरुः॥ विरिंच्यादीनामपि ब्र
ह्मविद्याप्रदायकत्वाद्गुरुतमः॥ यो ब्रह्माणमिति मंत्रवर्णात्॥ धाम ज्योतिः नारायणपरो ज्योतिरि

अमृत्युः सर्वदृक्सिंहः संधाता संधिमान्स्थिरः॥ अजो दुर्मर्षणः शास्ता विश्रुतात्मा
सुरारिहा॥ ३८॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः॥ निमिषोऽनिमिषः स्रग्वी वाचस्
पतिरुदारधीः॥ ३९॥

मंत्रवर्णात्॥ सर्वकामानामास्पदत्वाद्वा धाम॥ परं ब्रह्म धामेति श्रुतेः॥ सत्य
वदनलक्षणधर्मरूपत्वात्सत्यः॥ तस्मात्सत्यं परमं वदंतीति श्रुतेः॥ सच्च त्यच्च सत्यमिति वा सत्यः॥ प्रा
णा वै सत्यं तेषामेष सत्यमिति श्रुतेः॥ अवितथः सत्यः पराक्रमो यस्य स सत्यपराक्रमः॥ निमीलिते नय
ने ने योगनिद्रायातो निमिषः॥ मत्स्यरूपतया अनिमिषः॥ नित्यप्रबुद्धस्वरूपत्वाद्वात्मस्वरूपतया वा
अनिमिषः॥ वैजयंत्याख्यां भूततन्मात्ररूपां स्रजं नित्यं बिभर्तीति स्रग्वी॥ वाचस्पतिरुदारधीरिति पदद्व
यस्यैकं नाम॥ वचसः पतिर्वाचस्पतिः॥ सर्वार्थविषया धीरस्येति उदारधीः॥ ३९॥

ओं
वि॰ टी॰
२५

श्रयं उत्कृष्टं पदं नयति स्वभक्तमिति अग्रणीः ॥ भूतग्रामस्य नियंतृत्वाद् ग्रामणीः ॥ कांतिः सर्वाति
शायिन्यस्येति सः श्रीमान् ॥ प्रमाणानुग्राहकोपकारकस्तर्कोन्यायः ॥ जगद्यंत्रनिर्वाहकोनेता ॥
श्वसनरूपेण भूतानि चेष्टयतीति समीरणः ॥ सहस्राणि मूर्द्धानो ऽस्येति सहस्रमूर्द्धा ॥ विश्व
स्यात्मा विश्वात्मा ॥ सहस्राणि अक्षीणि अक्षाणि वास्य सहस्राक्षः ॥ सहस्राणि पादान्यस्येति सहस्र

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सहस्रमूर्द्धा विश्वात्मा सह
स्राक्षः सहस्रपात् ॥ ३७ ॥ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्द्दनः ॥ अहः सं
वर्त्तको वह्निरनिलो धरणीधरः ॥ ३८ ॥ ॥ ॥ नमो रामायनमः

पात् सहस्रशीर्षा पुरुष इति मंत्रवर्णात् ॥ २० ॥ संसारचक्रमावर्तयितुं शीलमस्येत्यावर्तनः ॥ संसा
रबंधनान्निवृत्त आत्मास्य स्वरूपमस्येति निवृत्तात्मा ॥ आच्छादिकया ऽविद्यया संवृतत्वात्संवृतः
सम्यक् प्रमर्द्दयति रुद्रकालादिभिर्विभूतिभिरिति संप्रमर्द्दनः ॥ सम्यगह्नां प्रवर्तनात् सूर्योहः
संवर्तकः ॥ वहनाद्वह्निः ॥ अनादिनो निलयो वा ऽनिलः ॥ शेषरूपेण वराहरूपेण धरणीं राम
धत्त इति धरणीधरः ॥ २८ ॥ श्रीरामायनमः ॥ श्रीपरमेश्वरायनमो नमः ॥ श्रीरामायनमो नमः २५

श्रीः परमात्मा सनातन इति व्यासवचनात् ॥ ३९ ॥

शोभनः प्रसादो ऽस्य सः प्रकारवतामपि शिशुपालप्रभृतीनां मोक्षं प्रयच्छतीति सुप्रसादः ॥ रजस्त
मोभ्यामकलुषितमंतःकरणमात्मास्येति प्रसन्नात्मा ॥ करुणाई स्वभावत्वाद्वा अवाप्तसकलका
मत्वाद्वा विश्वं धृत्वा तीति विश्वधृक् ॥ विश्वं भुंक्ते भुनक्ति पालयतीति वा विश्वभुक् ॥ हिरण्यगर्भा
दिरूपेण विविधं भवतीति विभुः ॥ नित्यं विश्वं भुवनमिति मंत्रवर्णात् ॥ सत्करोति पूजयतीति सत्क
र्ता ॥ पूजितैरपि पूजितः ॥ सत्कृतः ॥ न्याय्यवृत्तितया साधुः साधयतीति साधुः ॥ साध्यभेदानुपादाना
त्साध्यमात्रसाधको वा ॥ जनानां संहारकाले ऽपकृंते ऽपनयतीति जह्नुः ॥ जहाति भक्तविरुद्धान्भक्तान्प्र
नयतीति वा जह्नुः ॥ नरस्यात्मानतो जातानाकाशादीनि नाराणि तानि कार्याणि अयनं कारणात्मा

सुप्रसादः प्रसन्नात्मा विश्वधृक् विश्वभुग्विभुः ॥ सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो
नरः ॥ ३९ ॥ व्याप्नोति अतस्तत्तस्यायनमिति नारायणः ॥ यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूय
ते पि वा ॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति मंत्रवर्णात् ॥ नराज्जातानि तत्वानि नाराणी
ति विदुर्बुधाः ॥ तान्येव चायनं तस्य तेन नारायणः स्मृत इति वचनात् ॥ अयनत्वान्नारायणः ॥ प्रलय
नीति नित्यं वा यस्मिन्सर्वाणि संविशंतीति स्मृतेः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य
ताः पूर्वं तेन नारायणः स्मृत इति श्रीमानववचनाद्वा नारायणः ॥ नारायणायनमः इत्यष्टमेवस
त्वं संसारघोरविषसंहारणाय मंत्रं ॥ अप्येतत्तु भवामयोपनयो यतयोः सरागाद्यैर्सेव्यताप्युपदिश्यमाप्य

॥ इति नरसिंहपुराणे ॥ नमः इति नमः ॥

गो
वि॰टी॰
२५

यस्मिन्संख्या नामरूपभेदादिनविद्यते सोऽसंख्येयः ॥ अप्रमेयश्चात्मास्वरूपमस्येति अप्रमेयात्मा सर्वा
तिशेते सर्वमतो विशिष्टः ॥ विश्वतः परमं नित्यमिति श्रुतेः ॥ शिष्टं शासनं करोतीति शिष्टकृत् ॥ शिष्टा
न्करोति पालयति वा सामान्यवचनो धातुर्विशेषवचनो दृष्टः ॥ कुरुकाष्ठानीति आहरणे यथा तद्व
दिति शिष्टकृत् ॥ निरंजनः शुचिः शुद्धो निर्द्वन्द्वो दृश्यमानत्वाद्दर्शोऽस्येति सिद्धार्थः ॥ सत्यकाम इति श्रुतेः
सिद्धो निष्पन्नः संकल्पोऽस्येति सिद्धसंकल्पः ॥ सत्यसंकल्प इति श्रुतेः सिद्धिफलानि कर्तृभ्यः साधिका

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सि
द्धिदः सिद्धिसाधनः ॥ ७० ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्द्धनो व
र्द्धमानश्च विविक्तः श्रुतिसागरः ॥ ५२ ॥

रात्रुरूपतो ददातीति सिद्धिदः ॥ सिद्धेः साधक
त्वात्सिद्धिदः ॥ सिद्धेः साधकत्वात्सिद्धिसाधनः ॥ ५० ॥ वृषो धर्मः तु एवं तं देवा होहादशाहप्रभृति
सवृषाहः ॥ वृषाहं स्यन्नराजाहं ॥ सर्विश्वप्रजितिस्समासान्तः ॥ सयस्यास्तीति वृषाही ॥ वर्षत्येष
भक्तेभ्यः कामानिति वृषभः ॥ याज्ञवल्क्येनोक्तं ॥ विष्णुर्विक्रमणादिति विष्णुः ॥ वृषरूपाणि सोपाना
नि पर्वाण्यस्य परमं धामारुरुक्षोः ॥ अन्नोवृषपर्वा प्रजा वर्षन्तीवोदरं यस्येति वृषोदरः ॥ वर्द्धयतीति वर्द्धनः
प्रपंचरूपेण वर्द्धत इति वर्द्धमानः ॥ इत्थं वर्द्धमानोऽपि पृथगेवावतिष्ठत इति विविक्तः ॥ श्रुतयः साग

वृषभो विष्णुर्वृषपर्वा वृषोदरः वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ॥ ५२ ॥

सम
२५

गोभना भुजा जगद्रक्षाकारा अस्येति सुभुजः ॥ पृथिव्यादीन्यपि धारकाण्यन्यैर्धारयितुमश
क्यानि धारयन्न केनापि धारयितुं शक्यत इति दुर्धरः ॥ दुःखेन ध्यानसमये मुमुक्षुभिर्ध्रियते धा
र्यत इति वा दुर्धरः ॥ यतो निःसृता ब्रह्ममयी वाक् तस्माद्वाग्मी ॥ महांश्चासाविन्द्रश्चेति महेन्द्रः
ईश्वराणामपीश्वरः ॥ वसु धनं ददातीति वसुदः ॥ अन्नादो वसुदान इति श्रुतेः ॥ काद्यमात्म
नः स्वरूपमाच्छादयतीति वासुः ॥ दीयमानं तद्वस्त्वपि स एवेति वा वसुः ॥ अन्तरिक्ष एव वसति

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ॥ ५२ ॥
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥

भास्कर इत्यसावादरेणेव वसनेन वा वसुः ॥ अन्तरिक्षसदिति श्रुतेः ॥ एकरूपमस्य न विद्यत
इति नैकरूपः ॥ ज्योतींषि विष्णुर्भुवनानि विष्णुरिति विष्णुपुराणे ॥ बृहन्महद्वराहाद्यात्मक
महावराहरूपमस्येति बृहद्रूपः ॥ शिपिः पशुः प्रतितिष्ठत इति यत्तद्रूपेण स इति शिपिविष्टः
यज्ञमूर्तिः ॥ यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठत इति श्रुतेः ॥ शिपयो रश्म

मतः ॥ नमस्वैशाद्विष्टाः शिपिविष्ट इहोच्यते ॥ सर्वेषां प्रकाशनशीलत्वात्प्रकाशनः ॥ ५२ ॥ ॥ रा ॥

[illegible]

ओजः प्राणबलं ॥ तेजः शौर्यादयो गुणाः ॥ द्युतिं दीप्तिं धारयतीति ओजस्तेजोद्युतिधरः ॥ अथवा ओ-
जस्तेज इति नामद्वयं ॥ बलं बलवतामस्मि तेजस्तेजस्विनामहमिति भगवद्वचनात् ॥ ज्ञानलक्षणां द्यु-
तिं धारयतीति द्युतिधरः ॥ प्रकाशः स्वलक्षण आत्मास्येति प्रकाशात्मा ॥ सवित्रादिभिर्विभूतिभि-
र्विश्वं प्रतापयतीति विश्वतापनः ॥ धर्मज्ञानवैराग्यादिभिरुपेतत्वात् ऋद्धः ॥ स्पष्टमुदात्तमोंकारल-
क्षणमक्षरमस्येति स्पष्टाक्षरः ॥ ऋग्यजुःसामलक्षणो मंत्रः मंत्रवाच्यत्वाद्वा मंत्रः ॥ संसारतापतिग्मां-
शुतापतापितचेतसां चंद्रांशुरिवाल्हादकरत्वाच्चंद्रांशुः ॥ भास्करद्युतिसाधर्म्याद्भास्करद्युतिः ॥ ७७ ॥ म-

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भा-
स्करद्युतिः ॥ ७७ ॥ अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः से-
तुः सत्यधर्मपराक्रमः ॥ ७७ ॥

थ्यमाने पयोनिधावमृतांशुश्चंद्रो यस्योद्भवो यस्मात्सः अमृ-
तांशूद्भवः ॥ भातीति भानुः ॥ तमेव भांतमनुभाति सर्वमिति श्रुतेः ॥ शश इव बिंदुर्लक्ष्म यस्य सः श-
शबिंदुश्चंद्रवत्प्रजाः पुष्णातीति शशबिंदुः ॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मक इति
भगवद्वचनात् ॥ सुराणां शोभनदातॄणामीश्वरः सुरेश्वरः ॥ संसाररोगभेषजत्वात् औषधं जगतः
सउत्तारणहेतुत्वात् असंभेदकरत्वात् सेतुर्विधारको वर्णाश्रमादीनामिति जगतः सेतुः ॥ एष सेतु-
र्विधारण एषां लोकानामसंभेदायेति श्रुतेः ॥ सत्याश्च वितथा धर्मज्ञानवैराग्यादयो गुणाः पराक्र-

भूतभव्यभवंतो भूतग्रामास्तैर्नाथ्यते याच्यते उपतप्यत आशास्ते तेषामीष्टे इति भूतभव्यभवन्नाथः
पवत इति पवनः ॥ पवनः पवतामस्मीति भगवद्वचनात् ॥ पावयतीति पावनः ॥ भीषास्माद्वातः
पवत इति श्रुतेः ॥ अनल्प्राणितत्वेन एव अविनाऽनत्वाद्धा नालं पर्याप्तमस्य विद्यत इति वानलः ॥ अग्निध-
मरस्मि इत्यादिश्रुतेः ॥ कामान् हंति मुमुक्षूणां भक्तानां हिंसकानां चेति कामहा ॥ सात्विकानां कामिनां
कामान् करोतीति कामकृत् ॥ कामस्य प्रद्युम्नस्य जनकत्वेन वा कामकृत् ॥ अभिरूपतमः कांतः ॥
काम्यते मोक्षकांक्षिभिरिति कामः ॥ भक्तानां प्रकर्षेण कामान् ददातीति कामप्रदः ॥ प्रकर्षेण भव-

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥ कामहा कामकृत्कांतः कामः कामप्रदः
प्रभुः ॥ ७८ ॥ युगादिकृद्युगावर्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्र-
जिदनंतजित् ॥ ७९ ॥

नात्प्रभुः ॥ ७८ ॥ युगादेः कालभेदस्य कर्तृत्वाद्युगादिकृत् ॥ युगादेरारंभ-
करोतीति वा युगादिकृत् ॥ नाम्नां वस्तुतीयं शतं विवृतं ॥ ३०० ॥ युगानि कृतादीनि आवर्तयति काला-
त्मनेति युगावर्तः ॥ एका माया न विद्यते वह्वीर्मायावहतीति नैकमायः ॥ नलोपो नञ इति
नकारलोपो भवति ॥ नकारानुबंधरहितस्यापि नकारस्य श्रवणं निषेधवाचिनो विद्यमानत्वात् ॥ कल्पां-
ते सर्वग्रसनान्महदशनमस्येति महाशनः ॥ सर्वेषां बुद्धींद्रियाणामगम्योऽदृश्यः ॥ स्थूलरूपेण व्यक्तरू-
पमस्येति स्वयंप्रकाशत्वाद्वेति व्यक्तरूपत्वादिति व्यक्तस्वरूपः ॥ सुराणां सहस्राणि जयतीति सह-

परमानंदात्मत्वेन प्रिय इष्टः ॥ यज्ञेन पूजित इति सर्वेषां तु कृत्स्नत्वाद्वा विशिष्टः ॥ शिष्टानां विदुषामिष्टः
शिष्टेष्टः ॥ शिष्टा इष्टा अस्येति वा शिष्टेष्टः ॥ शिष्टैरिष्ट इति वा ॥ प्रियो हि ज्ञानिनोत्यर्थमहमिति श्रीभगवद्
वचनात् ॥ शिखंडः कलापो कलापोत्तंसकरणे यस्येति शिखंडी गोपवेषधरो यतो नह्यति भूतानि मा
ययेतो नहुषः ॥ कामानां वर्षणेन वृषः ॥ वृषो हि भगवान्धर्मः स्मृतो लोकेषु भारत ॥ नैघंटुकप
दाख्यानैर्विद्धि मां वृषमित्युतेति महाभारते ॥ साधूनां क्रोधं हंतीति क्रोधहा ॥ असाधुषु क्रोधं करोतीति
क्रोधकृत् ॥ क्रियत इति कर्म जगत्तस्य कर्ता ॥ एतेषां पुरुषाणां कर्तृत्वं यस्य वै तत्कर्मस्स वेदितव्य इ

इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहु
र्महीधरः ॥ ७७ ॥ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठा
नमप्रमत्तः प्रतिष्ठितः ॥ ७८ ॥

ति श्रुतेः ॥ विश्वे बाहवो यस्येति विश्वबाहुः ॥ विश्वतो बाहुरि
ति श्रुतेः ॥ महीं पूज्यां महीं वा धरतीति महीधरः ॥ ७७ ॥ षड्भावविकाररहितत्वादच्युतः ॥ शाश्वतं
शिवमच्युतमिति श्रुतेः ॥ जगत्सृष्ट्यादिकमभिप्रख्यातः प्रथितः ॥ क्षेत्रात्मना प्रजाः प्राणयतीति
प्राणः ॥ प्राणो वा अहमस्मीति बह्वृचः ॥ सुराणामसुराणां च प्राणान्ददातीति च प्राणदः ॥ अदि
त्यां कश्यपाद्वासवस्यानुजो जात इति वासवानुजः ॥ अपो यत्र निधीयंते सोऽपांनिधिः ॥ सरसाम
स्मि सागर इति भगवद्वचनं ॥ अधितिष्ठंति भूतानि उपादानकारणत्वेन ब्रह्मेत्यधिष्ठानं ॥ मत्त

स्कंदति अमृतरूपेण गच्छतीति स्कंदनं वा शोषयतीति स्कंदः ॥ स्कंदं धर्मपथं धारयती
ति स्कंदधरः ॥ धुरं वहतीति समस्तभूतजन्मादिलक्षणामिति धुर्यः ॥ अभिमतान्वरान्ददातीति
वरदः ॥ वरं गां दक्षिणां ददातीति यजमानाकारेणेति वा वरदः ॥ गौर्वै वर इत्यादिश्रुतेः ॥ मरुतः सप्त
वहादीन्वाहयतीति वायुवाहनः ॥ वसति वासयति आच्छादयति वासुर्यमितिवासुः ॥ दीव्यति क्री
डते विजिगीषते व्यवहरते द्योतते स्तूयते काम्यते गच्छतीति वा देवः ॥ वासुश्चासौ देव
श्चेति वासुदेवः ॥ छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः ॥ सर्वभूताधिवासश्च वासुदेवस्ततः

स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ७९ ॥

स्मृतः ॥ वसति वासे वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः ॥ वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वद
र्शिभिरित्युद्योगपर्वणि ॥ सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ॥ ततः स वासुदेवेति विद्वद्भिः परि
पठ्यत इति श्रीविष्णुपुराणे ॥ श्रीभागवतेपि ॥ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपा
वृतः ॥ सत्त्वे च तस्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे मनसा विधीयत इति श्रीशिववचनात् ॥ ज्ञानं
विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यं ॥ प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदं
तिजडभरतोक्तेः ॥ बृहंतो भानवो यस्य चंद्रसूर्यादिगामिनः ॥ तैर्विश्वं जगद्भासयतीति बृहद्भानुः ॥ आ
दिकारणं स च देवश्चेत्यादिदानादिगुणवान्वा देवः ॥ सुरशत्रूणां पुरदारणात्पुरंदरः ॥ वाचयम

जै
वि॰टी॰
२८

शोकादिषडूर्मिवर्जितोऽशोकः ॥ संसारसागरात्तारयतीति तारणः ॥ गर्भजन्मजरामृत्युलक्षणाद्
यात्तारयतीति तारः ॥ शूरो विक्रमवत्तया ॥ शूरस्यापत्यं वसुदेवसुतः शौरिः शूरकुलोद्भवत्वात्
जनानां जन्तूनामीश्वरो जनेश्वरः ॥ आत्मत्वेन हि सर्वेषामनुकूलः न हि स्वस्मिन्प्रातिकूल्यमा
चरतीत्यनुकूलः ॥ धर्मत्राणाय शतमावर्तनानि प्रादुर्भावा अस्येति शतावर्तः ॥ पद्मं हस्ते विद्यत
इति पद्मी ॥ पद्मनिभे ईक्षणे दृशावस्येति पद्मनिभेक्षणः ॥ ५० ॥ पद्मस्य नाभौ मध्ये कर्णिकायां

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्तः
पद्मी पद्मनिभेक्षणः ॥ ५० ॥ पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृ
त् ॥ महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ५१ ॥

स्थितः चतुर्दशभुवनात्मकं
पद्मं नाभौ यस्येति वा पद्मनाभः ॥ अरविन्दे पत्त्वादरविन्दाक्षः ॥ पद्मस्य हृदयाख्यस्य मध्ये पा
स्यत्वात्पद्मगर्भः ॥ पालयन्नन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयन्शरीरभृत् ॥ स्व
मायया शरीराणि बिभर्तीति वा शरीरभृत् ॥ महती ऋद्धिर्विभूतिरस्यास्तीति महर्द्धिः प्रपञ्चरूपे
ण वर्तमानत्वादृद्धः ॥ वृद्धः पुरातनः आत्मास्येति वृद्धात्मा ॥ महती अक्षिणी महान्ति अक्षाणि वा

राम
२८

न्त्योपमानं न विद्यतेऽस्येत्यतुलः ॥ न तस्य प्रतिमा अस्ति यस्य नाम महद्यश इति श्रुतेः ॥ न त्व
त्समोऽस्त्यभ्यधिकः कुतोऽन्य इति स्मृतेश्च ॥ शरः शरीराणि शीर्यमाणतया तेषु प्रत्यगात्मतया
भातीति शरभः ॥ बिभेत्यस्मादिति भीमः ॥ भीमादयो पादाने इति पाणिनिस्मृतेः ॥ सन्मार्गवर्ति
नामभीम इति वा ॥ सृष्टिस्थितिसंहारकालविद् षट्कालान्समयान् जानातीति वा समयज्ञः ॥ यज्ञ
ं ॥ साधुरस्येति वा समयज्ञः समत्वमाराधनमच्युतस्येति प्रह्लादचरितोक्तेर्हविर्भागं यज्ञेषु हविर्ह

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ ५२ ॥
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥

रतीति हविर्हरिः ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति भगवद्वचनात् ॥ अथवाहू
यते हविषा स एवेति हवि ॥ अवधान्तुरुषं पशुमिति हविरुच्यते ॥ स्वनिमाचेराणेस्तापं
अविद्यां तत्कार्यं संसारं वा हरतीति हरिः ॥ हरितवर्णत्वाद्वा हरिः ॥ हराम्यघं हि स्मर्तृणां हवि
र्भागं क्रतुष्वहं वर्णश्च मे हरिः श्रेष्ठस्तस्माद्धरिरहं स्मृत इति श्रीभगवद्व्यासवचनात् ॥ सर्वल
क्षणैः प्रमाणैर्लक्षणं दर्शनं जायते यत्तद्धि निर्दिष्टं सर्वलक्षणं तत्र साधुः सर्वलक्षणलक्षण्यः

डों
वि॰टी॰
२९

विगता॥दरो विनाशो यस्मात्सो वितरः ॥ स्वकंदनयारोहितोमूर्तिर्मत्स्यादिं वहन् रोहितः
सुषुन्नवत्सदेवं मार्गं नयतीति मार्गः ॥ परमानंदो येन प्राप्यते समार्ग इति वा ॥ उपादानंनि
मित्तंच कारणं सएव हेतुः ॥ दमादिसाधनेन उदाराउन्नमार्गनियोनयागम्यतइतिदा
मोदरः ॥ दामाद्दामोदरं विडुरिति भगवद्व्यासवचनात् ॥ यशोदयादाम्नाउदरे बद्धइति
वा दामोदरः ॥ दामानिलोकनामानि तानियस्योदरान्तरे ॥ तेनदामोदरोदेवः श्रीधरः

वितरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ ५३ ॥
महीधरो महाभागो वेगवानमिताशनः ॥

श्रीसमाश्रितइतिवा ॥ सर्वानभिवदनितस्मतेसहत इतिवा सहः ॥ महींगिरिरूपेण
धरतीति महीधरः ॥ वनानिविष्णुर्गिरयोदिशश्चेतिश्रीविष्णुपुराणोक्त्या धारय
न्देहं महातिप्रकृष्टानि भागजन्यानि भुंक्तेइति महाभागः ॥ महान्भागो भाग्यं श्रस्याव
तारेष्विति महाभागः ॥ वेगोजवस्तद्वान्वेगवान् ॥ अनेजदेकं मनसो जवीय इतिश्रुतेः

संहारकाले विश्वमग्नौ नीत्वमिनाशनः ॥ ५३ ॥

राम
२९

प्रपंचोत्पत्त्युपादानत्वाद्भवः ॥ उद्भवो भवान्संसाराडाद्भवः ॥ सर्गकाले प्रकृतिं पुरुषं च प्रवि
श्य क्षोभयामास तिक्षोभणः ॥ प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः ॥ क्षोभयामास भगवान्
सर्गकाले व्ययाव्ययावितिश्रीविष्णुपुराणे ॥ दिव्यतिं यतः क्रीडति सर्गादिभिर्विजिगीषते व्यव
हरति सर्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतइतितस्माद्देवः ॥ एकोदेवइतिमंत्रव

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥ ५४ ॥
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥

र्णनात् ॥ श्रीविभूतिर्यस्योदरान्तेजगद्रूपा स्थिता सः श्रीगर्भः ॥ परमश्चासावीशनशीलश्चेति परमे
श्वरः ॥ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरमिति भगवद्वचनात् ॥ जगदुत्पत्तौ साधकतमं करणं ॥ उ
पादानकरणं निमित्तं कारणं ॥ कर्ता स्वतंत्रः ॥ विचित्रं भुवनं कृतवानिति विकर्ता ॥ स एवं भगवा
न्स्वरूपं सामर्थ्यं चेष्टितं तस्य ज्ञातुं न शक्यत इति गहनः ॥ गूहते संवृणोति स्वरूपादिनिमा

यथाइतिगुहः ॥ ५४ ॥

ॐ वि॰ टी॰ ३०

संविन्मात्रस्वरूपत्वाद्व्यवसायः॥ यस्मिन्व्यवस्थितिः सर्वस्य स व्यवस्थानः॥ लोकपालाद्यधिकारान्
प्राणिजातानि जरायुजाण्डजस्वेदजउद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रावांतरवर्णब्रह्मचर्यगृहस्थवानप्रस्थसन्न्यास
लक्षणाश्रमतद्धर्मादिकान्विभज्य करोतीति वा व्यवस्थानः॥ कृत्यल्युटो बहुलमिति बहुलग्रहणा
त्कर्तरि ल्युट्प्रत्ययः॥ यत्र भूतानां स्थितिः प्रलयात्मिका समीचीना स संस्थानः॥ ध्रुवादी

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः॥
परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः॥५५॥

नां कर्मानुरूपाणि स्थानानि ददातीति स्थानदः॥ अविनाशित्वाद्ध्रुवः॥ परा ऋद्धिर्विभूतिरस्ये
ति परर्द्धिः॥ अनन्याधीनसिद्धत्वात्सविशेषात्मतया परमः स्पष्टः॥ परमानंदैकरूपत्वात्तुष्टः॥ सर्वत्र सं
पूर्णत्वात्पुष्टः॥ ईक्षणं दर्शनं यस्य शुभं शुभकृत् नराणां मोक्षकामानां मोक्षदं भोगिनां भोगदं स
र्वसंदेहविच्छेदकारणं पावनं हृदयग्रंथिविच्छेदकरं सर्वकर्मणां क्षपणं अविद्यायाश्च निवर्तकं

त्यशुभेक्षणः॥ भिद्यते हृदयग्रंथिरि

राम ३०

निर्वाणं हृल्लक्षणो योगिनोरसं तत्र इति रामः॥ रमंते योगिनो नंते सत्यानंदे चिदात्मनि॥ इति रा
मपदेनासौ परं ब्रह्माभिधीयत इति पद्मपुराणे॥ स्वेच्छया रमणीयं वपुर्वहन्वा रामः॥ विरामो
ऽवसानं प्राणिनां यस्मिन्निति विरामः॥ विगतं रजोऽस्य विषयसेवायामिति विरजः॥ विर
जः परयाकाशादिति श्रुतेः॥ यं विदित्वा अमृतत्वाय कल्पंते मुमुक्षवः स एव पंथा मार्गः॥ नान्यः

रामो विरामो विरजो मार्गो नेयो नयोऽनयः॥५६॥
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥

पन्था विद्यतेऽयनायेति श्रुतेः॥ मार्गेण सम्यक्ज्ञानेन जीवः परमात्मतया नीयत इति नेयः॥ न
यति नियतीति नयः॥ नेता मार्गो न यो नयः इति निरूपः परिकल्प्यते॥ नास्य नेता विद्यत इत्यनयः॥
इति नाम्नां नयेऽशांत विक्रांत॥ विक्रमशीलत्वाद्वीरः॥ शक्तिमतां विरिंच्यादीनामपि शक्तिमत्त्वाच्छ्रे
ष्ठः॥ सर्वभूतानां धारणाद्धर्मः॥ अपरे ऽपि धर्म इति श्रुतेः॥ परमो धर्मोऽराध्यत इति वा धर्मः श्रुतयः स्मृत

यस्य यस्याज्ञाभूताः स एव धर्मविदामुत्तम इति प

धर्मविदुत्तमः॥५६॥

विविधा कुण्ठा गतिः प्रतिहतिर्विकुण्ठा या कुर्वन्निति वैकुण्ठः ॥ जगदारम्भे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रतिबध्नाति इति ॥ मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना ॥ वायुश्च तेजसा सार्धं वैकुण्ठत्वं ततो मम इति शान्तिपर्वणि ॥ सर्वस्मात्पुरा सदनात् सर्वपापस्य सदनाद्वा पुरुषः स यत्पूर्वो-स्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष इति श्रुतेः ॥ पुरि शयनाद्वा पुरुषः सर्वासु पूर्षु शेत इति श्रुतेः ॥ प्राणिति क्षेत्रज्ञरूपेण प्राणात्मना चेष्टयन्वा प्राणः चेष्टाकारि न स्वप्राणस्य पीड इति विष्णुपुराणे ॥ द्यति खण्डयति प्राणिनां प्राणान् प्रलयादिषु इति प्राणदः ॥ प्र

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ॥ ५७ ॥
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥

णौति प्रणमन्तु इति वा प्रणवः तस्मादोमिति प्रणौति इत्यादि श्रुतेः ॥ प्रणमयन्ति इति वा प्रणवः ॥ प्रणवं तिह येवेदास्तस्मात्प्रणव उच्यते इति सनत्कुमारवचनात् ॥ प्रपञ्चरूपेण विस्तृतत्वात्पृथुः ॥ हिरण्यगर्भः सम्भूतिकारणं हिरण्मयमण्डं यद्वीर्यसम्भूतं तस्य गर्भ इति हिरण्यगर्भः ॥ त्रिदशशत्रून् हन्तीति शत्रुघ्नः ॥ कारणत्वेन सर्वकार्याणां व्यापनाद्व्याप्तः ॥ वाति गन्धं करोतीति वा वायुः ॥ पुण्यो गन्धः पृथिव्यां चेति भगवद्वचनात् ॥ अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज इति उद्योगपर्वणि ॥ द्यौरन्तरिक्ष

वि. टी. ३८

कालात्मना ऋतुशब्देन लक्ष्यत इति ऋतुः ॥ शोभनं निर्वाणफलं दर्शनं ज्ञानमस्य ॥ शुभे दर्शने ईक्षणे पद्मपत्रायते अस्येति ॥ सुखदयादेहविभ्रत इति वा सुखेन दृश्यते भक्तैरिति सुदर्शनः ॥ कलयति सर्वमिति कालः ॥ कालः कलयतामहमिति श्रीभगवद्वचनात् ॥ परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी ॥ परमेष्ठी विभ्राजत इति मन्त्रवर्णात् ॥ शरणार्थिभिः परितो गृह्यते

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥ ५८ ॥
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥

सर्वगत्वात्परितो ज्ञायत इति वा उपायादिकं भक्तैरर्पितं गृह्णातीति वा परिग्रहः ॥ सूर्यादीनामपि भयहेतुत्वादुग्रः भीषास्माद्वातः पवत इति श्रुतेः ॥ संवसन्ति भूतान्यस्मिन्निति संवत्सरः ॥ जगद्रूपेण वर्धमानत्वात् सर्वकर्माणि क्षिप्रं करोतीति वा दक्षः ॥ संसारसागरे क्षुत्पिपासादिभिः षड्भिरूर्मिभिरन्तरं गते क्रोधादिभिर्महाक्लेशरूपक्लेशैर्मदादिभिश्च श्रान्तानां विश्रान्तिकाङ्क्षिणां विश्राममोक्षं ददा

राम ३१

ॐ वि॰टी॰ ३२

विस्तीर्यन्ते समस्तानि जगन्त्यस्मिन्निति विस्तारः ॥ स्थितिशीलः स्थावरः ॥ स्थितिशीलानि पृथिव्यादी
नि तस्मिन् स्थितानीति स्थाणुः स्थावरस्थाणुः स्थावरः स्थाणुः ॥ संविदात्मना प्रमाणं प्रमतादि ॥ अन्यथाभा
वव्यतिरेकेण कारणमिति बीजमव्ययं ॥ पुरुषरूपान्तर्वैरर्थ्यत इत्यर्थः ॥ न विद्यते प्रयोजनमाप्तका
मत्वादस्येत्यनर्थः ॥ महान्तः कोशाः अन्नमयाद्याः आच्छादका अस्येति महाकोशः ॥ महान्भोगः सुख
रूपेणास्येति महाभोगः ॥ महद्भोगस्थानलक्षणं धनं साधनमस्येति महाधनः ॥५९॥ अवाप्तकल
कामत्वान्निर्वेदोऽस्य न विद्यत इति अनिर्विण्णः ॥ वैराजरूपेण स्थितः स्थविष्ठः ॥ अग्निर्मूर्द्धा चत्तुषी चंद्रसूर्यौ
इत्यादिश्रुतेः ॥ अजन्म अभूः ॥ अथवा भूः सत्तास्पदादित्वाद्भवतेः क्विप् ॥ महीवा ॥ इयं पश्चक्तसमारध

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं ॥ अर्थोऽनर्थो महाकोशो महाभोगो महाध
नः ॥५९॥ अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ॥ नत्तत्रनेमिर्नत्तत्री त्तमः त्तामः समी
हनः ॥६०॥

नाराधका धर्मास्तत्र बध्यन्त इति धर्मयूपः यस्मिन्नर्पितानामवाः यत्ता निर्वाणलत्तणफ
लप्रयच्छन्तो महान्तो जायन्ते स महामखः ॥ नत्तत्रतारकैः सार्द्धं चन्द्रसूर्यादयो ग्रहाः ॥ वायुपाशम
यैर्बन्धैर्निबद्धा ध्रुवसंज्ञिते ज्योतिषां चक्रं भ्रामयन्तः तारामयस्य शिशुमारस्य पुच्छदेशे व्यवस्थितो
ध्रुवः ॥ तस्य शिशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवद्वर्तमानस्य हृदयं विष्णुरिति कथितो नत्तत्रने
मिः ॥ शिशुमारस्य वर्णने विष्णुर्हृदयमिति श्रूयते स्वाध्यायब्राह्मणे ॥ चन्द्ररूपेण नत्तत्री नत्तत्राणाम
हं शशीति भगवद्वचनात् ॥ सर्वकार्येषु समर्थः त्तमः ॥ त्तमते वा इति त्तमः ॥ त्तमया पृथिवी समइति
वचनाद्वाल्मीकेः ॥ सर्वकार्येषु त्तपितेषु स्वात्मनावस्थित इति त्तामः ॥ त्तायो म इति निष्ठायां नकार

राम ३२

सर्वयत्तस्वरूपत्वाद्यत्तः ॥ सर्वेषां देवानां तुष्टिहेतुर्यत्ताकारेण प्रवर्त्तत इति वा यत्तः यत्तो वै विष्णुरिति श्रु
तेः ॥ यष्टव्योऽप्ययमेव यत्तफलदातृत्वादिति इज्यः ॥ ये यजन्ति मखैः पुण्यैर्देवतादीन्पितॄनपि ॥ आत्मानमा
त्मना नित्यं विष्णुमेव यजन्ति ते इति हरिवंशे ॥ सर्वासु देवतासु यष्टव्यासु प्रकर्षेणायमेव यष्टव्यो मोत्त
फलदातृत्वादिति महेज्यः ॥ यूपसहितो यत्तः क्रतुः ॥ आसनोपायिचोदनालत्तणः सत्रं सतां यत्त

यत्त इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ॥ सर्व
दर्शी विमुक्तात्मा सर्वत्तो ज्ञानमुत्तमं ॥६१॥

इति वा सतां मुमुत्तूणां नान्या गतिरिति सतां गतिः ॥ सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यती
ति सर्वदर्शी ॥ स्वभावेन विमुक्तात्मा अस्येति विमुक्तात्मा ॥ विमुक्तश्चासौ आत्मा च इति विमुक्तात्मा ॥ विमुक्तस्य विमु
क्तिः स्वाभाविकेन बोधेनेति सर्वदर्शी स्वभावेन विमुक्तात्मा ॥ सर्वश्चासौ ज्ञश्चेति सर्वत्तः ॥ इदं सर्वं यदयमात्मेति ॥ ज्ञानमुत्तममित्युत्तमवि
ज्ञानमिति श्रुतेः ॥ स वेत्त्यासौ ज्ञश्चेति सर्वत्तः ॥ इदं सर्वं यदयमात्मेति श्रुतेः ॥ ज्ञानमुत्तममित्यत्र सवि
शेषणमेकं नाम ज्ञानमुत्तमं अनवच्छिन्नं सर्वस्यात्मसाधकमिति ज्ञानमुत्तमं ब्रह्म सत्यं ज्ञानमनन्तमिति

शोभनं व्रतं नमस्ते निसुव्रतः ॥ सकृदेव प्रपन्नाय तवास्मीति च याचते ॥ अभयं सर्वभूतेभ्यो ददा
म्येतद्व्रतं ममेति श्रीरामायणे शोभनं मुखमस्य स देति सुमुखः ॥ प्रसन्नवदनं चारुपद्मपत्रायतेक्ष
णमिति श्रीविष्णुपुराणे ॥ वनवाससुखं त्वाह्ला राघवो रामः सुमुखः ॥ स पितुर्वचनं श्रीमानभि
षेकात्परं प्रियं मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् समानान्तु महारण्य [illegible] च
विहत्य परमप्रीतः स्यात्सामि वचनेन च ॥ न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् ॥ सर्वलोका
तिगस्येव मनो रामस्य विव्यथे ॥ इति श्रीरामायणे सर्वविद्योपदेशेन च सुमुखः योऽल्पाणावि

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ९२ ॥

दधाति सर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति श्रुतेः ॥ शब्दादिस्थूलकारणरहितत्वात्सूक्ष्मः यो
स्याकाशवाय्वादीनां तु तत्तत्स्थूलकारणानि तदभावात्सूक्ष्मः सर्वगतं सुसूक्ष्ममिति श्रुतेः ॥ शो
भनो घोषो वेदात्मकोऽस्येति मेघगम्भीरनिर्घोषत्वाद्वा सुघोषः ॥ सद्वृत्तानां सुखं ददातीति सुखदः ॥
प्रत्युपकारनिरपेक्षतया उपकारित्वात्सुहृत् ॥ निरतिशयानन्दत्वा
न्मनो हरतीति मनोहरः ॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः ॥ जितः क्रोधो येन स
जितक्रोधः ॥ वेदमर्यादास्थापनार्थं त्रिदशारीन्हन्तीति न तु कोपवशात् ॥ विक्रमशालिनौ बाहू

स्वापयन्नात्मसंबोधविधुरान्मायया [illegible] स्वापनः ॥ स्वतन्त्रः स्ववशः जगदुत्पत्तिस्थितिलय
हेतुत्वादाकाशवत्सर्वगतत्वाद्व्यापी ॥ जगदुत्पत्त्यादिनिमित्तविभूतिभिरनेकधा तिष्ठन्नैकात्मा जगदु
त्पत्तिप्रभृतिकर्माणि करोतीति ततो नैककर्मकृत् ॥ वसत्यत्राखिलमिति वत्सरः ॥ भक्तिस्नेहत्वाद्वत्सलः
वत्सास्सन्त्यस्य कामवत् इति लप्रत्ययाभिधानात् ॥ वत्सानां पालकत्वाद्वत्सी ॥ नस्य जगत्पितुर्वत्सभूताः प्र
जा इति वा वत्सी ॥ रत्नानि गर्भभूतान्यस्येति स रत्नगर्भः ॥ धनानामीश्वरो धनेश्वरः ॥ ९३ ॥ धर्मान्न

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ॥ व
त्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ९३ ॥

गोपायतीति रक्षतीति धर्मगुप् ॥ धर्मसंस्थापनार्थाय संभवामीति भगवद्वचनात् धर्माधर्मविहीनोऽपि ध
र्ममर्यादास्थापयन् धर्ममेव करोतीति धर्मकृत् ॥ धर्मान्धारयतीति धर्मी ॥ सदिति यत्परं ब्रह्म सदेव सो
म्येदमिति श्रुतेः ॥ अपरं ब्रह्म असत् वाचारम्भणं विकारो नामधेयमिति श्रुतेः ॥ क्षरः सर्वाणि भूतानि कूट
स्थः कारणमक्षरमिति ॥ द्वाविमौ पुरुषौ लोके इति श्रीभगवद्वचनात् ॥ कर्तृत्वादिविज्ञानैकल्पितमिति वि
ज्ञानात्मा अत एव विज्ञानात्मा ॥ आत्मानं कर्तृत्वादिज्ञानं कल्पितमिति तद्व्याशनावकुण्ठितो जीवो विज्ञाता

ॐ वि॰टी॰ ३५

आदित्यादिगतानंशवोऽस्यैवेति श्रुयमेव सुव्रः सहस्रांशुः ॥ येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः ॥ यदादित्यगतं तेज इति स्मृतेश्च ॥ विशेषेण शेषदिग्गजभूधरान्समस्तभूतानां धातॄन्धातीति विधाता ॥ नित्यनिष्पन्नचैतन्यस्वरूपत्वात्कृतलक्षणः ॥ कृतानि लक्षणानि शास्त्राण्यनेनेति कृतलक्षणः ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनादिति श्रीमहाभारते ॥ सजातीयविजातीयव्यवच्छेदकलक्षणानि सर्वभावानां येन कृतमिति वा कृतलक्षणः ॥ आत्मनि श्रीवत्सलक्षणं वक्षसि तेन कृतमिति वा कृतलक्ष-

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरं ॥ अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ९४

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ९५

णः ॥ ९४ ॥ गभस्तिचक्रमध्ये सूर्यात्मना स्थितो गभस्तिनेमिः ॥ सत्त्वगुणप्रकाशकं प्राधान्येनापि तिष्ठतीति सर्वप्राणिषु वा तिष्ठतीति सत्त्वस्थः ॥ विक्रमशालित्वात्सिंहवत्सिंहः ॥ हृशहलोपेन सत्यभामा भामेतिवत्सिंहः सिंहः ॥ भूतानां महानीश्वरः ॥ भूतेन सत्येन सत्य एव परमो महानीश्वर इति वा भूतमहेश्वरः ॥ सर्वभूतान्यादीयन्तेऽनेनेत्यादिश्चासौ देवश्चेत्यादिदेवः ॥ सर्वान्भावान्परित्यज्य आत्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव इति श्रुतेः ॥ देवानां प्राधान्याद्देवानामीशो देवेशः ॥ देवान्बिभर्तीति देवभृच्छक्रः तस्यापि शास्ति

राम ३५

जन्मसंसारबन्धनादुत्तारयतीति उत्तरः ॥ उत्कृष्ट इति वा उत्तरः विश्वस्मादिंद्र उत्तर इति श्रुतेः ॥ गवां पालनाद्गोपवेषधरो गोपतिः ॥ गोर्मही तस्याः पतिर्गोपतिः ॥ समस्तभूतानि पालयन्गोप्ता ॥ न कर्मणा ज्ञानकर्मभ्यां वा गम्यते ज्ञानेन वेगम्यत इति ज्ञानगम्यः ॥ कालेनापरिच्छिन्नत्वात्पुराऽपि भवतीति पुरातनः ॥ शरीरारम्भकाणां भूतानां भरणात्प्राणरूपधरः शरीरभूतभृत् ॥ पालको भोक्ता ॥ परमानन्दसन्दोहसम्भोगाद्वा भोक्ता ॥ इति नाम्नां पञ्चमं शतं विवृतं ॥ ५०० ॥ कपिर्वराह इत्युच्यते इति वा राघवरूपस्थितः कपीन्द्रः ॥ कपीनां वानराणामिन्द्रो राघवः कपीन्द्रः ॥ भूरयोऽयत्न दक्षिणा धर्ममर्यादादर्शयता स्ववितीर्णा इति भूरिदक्षिणः ॥ ९६ ॥ सोमं पिबति सर्वेषु यज्ञेषु

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ९६

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ॥ विनयो जयः सत्यसन्धो दाशार्हः सात्त्वतांपतिः

यष्टव्यां देवतारूपेणेति सोमपः ॥ धर्ममर्यादां दर्शयन्यजमानरूपेणेति सोमपः ॥ स्वात्मनामृतं रसं पिबन्नमृतपः ॥ असुरैर्ह्रियमाणं गृहीत्वा देवान्पाययित्वा स्वयमपिबदिति वा अमृतपः ॥ सोमरूपेणौषधीः पोषयन्सोमः ॥ उमया सह वर्तत इति वा ईश्वरः सोमः ॥ पुरून्बहून्विजयत इति पुरुजित् ॥ विश्वरूपत्वात्पुरुरुत्कृष्टत्वाच्च सत्तमः ॥ पुरुश्चासौ सत्तमश्चेति पुरुसत्तमः ॥ विनयं दण्डं प्रजानां करोतीति विनयः ॥ समस्तानि भूतानि जयतीति जयः ॥ सत्या सन्धा सङ्कल्पोऽस्यास्तीति सत्यसन्धः ॥ दाशो दानं तदर्हतीति दाशार्हः ॥ दाशार्हकुले भव इति वा प्रायपाठः ॥ दाशार्हस्यापत्यमिति दाशार्हः ॥ सात्वतं नाम तन्त्रं तत्करोतीति तद्वाचष्ट इति णिच्प्रत्यये

त्व इति सात्त्वतां पतिः ॥ ९७ ॥

ॐ
वि॰टी॰
३५

प्राणान्क्षेत्रज्ञरूपेण धारयञ्जीवः ॥ विनयितृत्वं विनयिता ॥ नोचसा ज्ञात्वा प्रपतिप्रजानामिति विनय
ता साक्षी ॥ अथवा नयते गतिवाचिनो रूपं विनयिता ॥ साक्षी साक्षाद्द्रष्टा आत्मानतिरिक्तं वस्तुन प
श्यतीति ॥ प्रजानां मुक्तिं ददातीति मुकुंदः ॥ पृषोदरादित्वात्साधुत्वं ॥ वर्णलोपसामान्यान्निरुक्तवचना
न्नैरुक्तानां मुकुंद इति निरुक्तिः ॥ अमिता अपरिच्छिन्ना विक्रमास्त्रयः पदन्यासा अस्येत्यमितः ॥ विक्र
मः शौर्यमस्येति वा अमितविक्रमः ॥ अंभांसि अस्मिन्निधीयंत इत्यंभोनिधिः ॥ तानि हि व्याख्याता नि चत्वा

जीवो विनयिता साक्षी मुकुंदोमितविक्रमः ॥ अंभोनिधिरनंतात्मा महोदधिशयोंतकः ॥ ॥ ९७ ॥

रि अंभांसि देवा मनुष्याः पितरोऽसुरा इति श्रुतेः ॥ देवादयो अस्मिन्निधीयंते इत्यंभोनिधिः समुद्रो वा ॥ सरसा
मस्मि सागर इति भगवद्वचनात् ॥ देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वादनंतात्मा ॥ संहृत्य सर्व
भूतानि एकार्णवं जगत्कृत्वा अधिशेते महोदधिमिति महोदधिशयः ॥ अंतं करोति भूतानामित्यंतकः ॥ राम
नन्करोति तदा चष्टे इति णिविप्रत्ययेण कृत्वा विनि एकलिङ्गरूपं ॥ ९७ ॥ रामोजयति ॥ ९७ ॥ ३५

श्चाहिंसाज्जायत इति कामो अजः ॥ महत्पूजा तदर्हत्वान्महार्हः ॥ स्वभावेनैव भाव्यो नित्यनिष्प
न्नरूपत्वादिति स्वाभाव्यः ॥ जिताः अमित्राः रागद्वेषादयो बाह्याः रावणादयश्च येनेति जितामित्रः
स्वात्मामृतरसास्वादनान्नित्यप्रमोदते ध्यायिनो ध्यानमात्रेण प्रमोदं करोतीति वा प्रमोदनः ॥
आनंदस्वरूपमस्येति आनंदः ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ नंद

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः
आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥ ९८

यतीति नंदनः ॥ सर्वाभिरुपपत्तिभिः समृद्धो नंदः ॥ सुखं वैषयिकं नास्ति विघ्न इति श्रुत्यानंदो वा ॥ यो वै
भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः ॥ सत्या धर्माः ज्ञानादयोऽस्येति सत्यधर्मा ॥ त्रयो विक्रमास्त्रि
षु लोकेषु क्रांता यस्य स त्रिविक्रमः ॥ त्रीणि पदा विचक्रम इति श्रुतेः ॥ त्रिरित्येव त्रयो लोकाः की
र्तिता मुनिसत्तमैः ॥ क्रमते तांस्त्रिधा सर्वांस्त्रिविक्रमोसि जनार्दन इति श्रीहरिवंशे ॥ ९८ ॥ राम ॥ राम

ॐ
वि॰दी॰
३६

महर्षिः कपिलाचार्य इति सविशेषणमेकं नाम॥ महांश्चासौ ऋषिश्चेति महर्षिः॥ कृत्स्नस्य वेद
स्य दर्शनात्॥ अन्ये वेदैकदेशदर्शनादृषयः॥ कपिलश्चासौ सांख्यस्य शुद्धात्मतत्त्वविज्ञानस्या
चार्यश्चेति कपिलाचार्यः॥ शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयत इति व्यासस्मृतेः॥ ऋषिं प्र
सूतं कपिलं महांतमिति श्रुतेश्च॥ सिद्धानां कपिलो मुनिरिति स्मृतेश्च॥ कृतं कार्यं जगत् ज्ञः आत्मा

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः॥
त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत्॥ ७०॥

कृतं च ज्ञश्चेति कृतज्ञः॥ मेदिन्याः भूम्याः पतिर्मेदिनीपतिः॥ त्रीणि पदान्यस्येति त्रिपदः॥ त्री
णि पदा विचक्रम इति मंत्रवर्णात्॥ गुणावेशेन संजातास्तिस्रो दशा अवस्था जाग्रदादयस्ता राम
सामध्यक्ष इति त्रिदशाध्यक्षः॥ मत्स्यरूपी महति निमग्ने प्रलयांभोधौ नावं बद्ध्वा विक्रीडितः म ३६
हाशृंगः॥ कृतस्यांते संहारं करोतीति कृतांतकृत्॥ कृतांतं मृत्युं कृंततीति वा कृतांतकृत्॥ ७०

महांश्चासौ वराहश्चेति महावराहः॥ गोभिर्वाणीभिर्विंदते वेत्ति वेदांतवाक्यैरिति गोविं
दः॥ गोभिरेव यतो वेद्यो गोविंदः समुदाहृत इति श्रीविष्णुतिलके॥ शोभना सेना गणात्मि
का यस्य स सुषेणः॥ कनकेन निर्मितं अंगदं कनकांगदं तद्यस्यास्तीति कनकांगदी॥ गु
ह्यो गभीरो नाम हृदयस्याख्यान रहस्योपनिषद्विद्यावेद्यत्वाद्गुहायां हृदयाकाशे निहित इति वा गु

महावराहो गोविंदः सुषेणः कनकांगदी॥ गु
ह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥ ७१॥

ह्यः॥ ज्ञानैश्वर्यबलादिभिर्गंभीरो गभीरः॥ दुःप्रवेशत्वाद्गहनः॥ अवस्थात्रयभावाभावसाक्षि
त्वाद्गहनो वा॥ वाङ्मनसयोरगोचरत्वाद्गुप्तः॥ एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते इति श्रुतेः॥
मनस्तत्त्वात्मिकं चक्रं बुद्धितत्त्वात्मिकां गदां जगद्रक्षार्थं धरतीति चक्रगदाधरः॥ ७१॥ रामेति

डों
वि॰टी॰
३७

विधाता वेधाः पृषोदरादित्वात्साधुत्वं ॥ स्वयमेव कार्यस्य करणेनं सहकारिता स्वेनिस्वांगः ॥ न केनाप्यवतारे भुजित इति जितः कृष्णद्वैपायनः कृष्णः ॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं कोह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदिति विष्णुपुराणवचनात् ॥ स्वरूपसामर्थ्याद्यच्युतत्व भावः द्वष्टः संहारकालेषु गणप्रजाः संकर्षतीति संकर्षणः ॥ संकर्षणोऽच्युत इति नामद्वंद्वं विशेषणं ॥ वारुणग्रासाय गतत्वादिदिस्योवरुणः ॥ स्वरश्मिस्तवरणात्साधगतः स्त्रीयौवरुणान्सायगतः

वेधाः स्वांगो जितः कृष्णो द्वैधः संकर्षणोऽच्युतः ॥
वरुणो वारुणो वृत्तः पुष्करात्तो महामनाः ॥ ७२ ॥

इममेवरुणश्रुधीहवमिति मंत्रवर्णात् ॥ वरुणस्यापत्यं वसिष्ठो गस्त्यो वा वारुणः ॥ वृत्त इवाचल यास्थित इति वृत्तः ॥ वृत्तश्ववलत्वादि विनिष्ठत्वेक इति यते ॥ व्यास्यायोद्दत्तेपत्तो पुष्करोपपत्तर तणिश्चस्ययेसतिपुष्करात्तः ॥ हृदयपुंडरीके चिंतितस्वरूपेण प्रकाशितात इतिपुष्करात्तः ॥ सहस्थि तेन कर्माणि मनसैव करोतीति महामनाः ॥ मनसैव जगत्सृष्टिं संहारं च करोति यः इति श्री विष्णुपुरा

९
६

राम
३०

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा ॥ सयस्यास्तीति भगवा न् ॥ उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति श्री विष्णुपुराणे ऐश्वर्यादिकं संहारकाले हंतीति भगाहा ॥ सुखरूपत्वादानंदी ॥ सर्वाभिः संपत्तिभिः समृद्धत्वादा नंदी वा ॥ भूतत्त्वमात्रनिर्मितां वैजयन्त्याख्यां वनमालां वहन् वनमाली ॥ हलमायुधमस्येति हला युधो बलभद्राकृतिः ॥ अदित्यां कश्यपाज्जातो वामनत्वे त्रिविक्रमाद्यमित्यादित्यः ॥ सावित्र मंडले स्थि तो ज्योतिरादित्यः ॥ हंहानि शीलोत्सादीनि सहत इति सहिष्णुः गतिश्च सोऽसंनमश्चेति गतिसत्तमः

।।१०८।।

भगवान्भगहानंदी वनमाली हलायुधः ॥ आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिस त्तमः ॥ ७३ ॥ सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ॥ दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनि जः ॥ ७४ ॥
७३ ॥ शोभनमिंद्रियादिमयं शार्ङ्गं धनुर्यस्यासौ सुधन्वा ॥ शत्रूणां खंडनात्खंडपरशुर्जामदग्न्याकृ तिरिति खंडपरशुः ॥ अखंडः परशुर्यस्येति वा ॥ सन्मार्गविरोधिविदारणाद्दारुणः ॥ द्रविणं वित्तं भक्ते भ्यः प्रददातीति द्रविणप्रदः ॥ दिवः स्पर्शित्वाद्दिवस्पृक् ॥ सर्वदृग्ज्ञानसर्वेषां तानां विस्तारकृद्व्यासः ॥ सर्वदृग्व्यास श्च वा सर्वं चत्तनदृक् सर्वदृक् ॥ सर्वाकारं ज्ञानं सर्वस्यदृष्टत्वाद्वा सर्वदृक् ॥ अंगुष्ठादिविभागेन वचनं उ क्ता वेदाः ॥ आद्यो वेदश्चैकविंशतिशाखः ॥ द्वितीयएको ज्ञरशतशाखः ॥ सामवेदः सहस्रशाखः ॥ अथ र्वणोऽनंतशाखत्वाभेदेन कृतः ॥ अन्यानि पुराणानि यत्नेन व्यस्तानीति व्यासः ॥ वत्सावचसपतिरयोनिजः

नामलिंगानुशासनटीका ॥ पसिकोविवसतिः

देवव्रतसमाख्यातैस्त्रिभिः सामभिः स्तुतस्त्रिसामा ॥ साम गायतीति सामगः ॥ वेदानां सामवेदो
ऽस्मीति भगवद्वचनात्सामवेदः ॥ सर्वदुःखोपशमलक्षणं परानंदरूपं निर्वाणं ॥ संसार
रोगस्यौषधं भेषजं ॥ संसाररोगस्य मोक्षकारिणीं ॥ परां विद्यामुपदिदेश गीतास्विति भिषक्
भिषक्तमं त्वा भिषजां शृणोमीति श्रुतेः ॥ मोक्षाश्रमं चतुर्थं कृतवानिति संन्यासकृत् ॥ संन्या
सिनां प्राधान्येन ज्ञानसाधनं शममाचष्ट इति शमः ॥ यतीनां प्रशमो धर्मो नियमो वनवासिनां

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ॥
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणं ॥७७॥

दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणामिति स्मृतेः ॥ तत्करोतीति तदाचष्ट इति शम एवास्य विष्णो
ते रूपं ॥ स्वस्वरूपभूतानां शमयितेति वा शमः ॥ विषयसुखेष्वसंगतया शान्तः ॥ निष्कलं निष्क्रि
यं शान्तमिति श्रुतेः ॥ प्रलयकाले नितरां तत्रैव तिष्ठन्ति भूतानीति निष्ठा ॥ समस्ताविद्यानि
वृत्तिः शान्तिः सा ब्रह्मैव परमुत्कृष्टमयनं स्थानं पुनरावृत्तिशंकारहितमिति परायणं ॥ शुभांग

राम
३८

सुंदरां तनुं धारयन् शुभांगः ॥ रागद्वेषादिभिर्मोक्षलक्षणां शांतिं ददातीति शांतिदः ॥ सर्गादौ
सर्वभूतानि ससर्जेति स्रष्टा ॥ कौ मेदिन्यां मोदत इति कुमुदः ॥ कोः पृथिव्याः वलनात्संवरणात्कु
वलं तोयं तस्मिन् शेषोदरे शेत इति कुवलेशयः ॥ शयवासिष्वकालादित्यलुक् सप्तम्याः ॥ कुवेरव
दरीफलेऽप्यधिशानेनत्तकः सोऽपि तस्य विभूतिरिति हरिः कुवलेशयः ॥ कौ भूम्या संधीयत इति स

शुभांगः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहि
तो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥७८॥ राम

र्पाणामुदरं कुवलं तस्मिन्भोगोदरे शेत इति कुवलेशयः ॥ गवां वृद्ध्यर्थं गोवर्धनं धृतवान् गोभ्यो हि
तो गोहितः ॥ गां भूमिं भारावतरणक्रियया शरीरग्रहणं कुर्वन् वा गोहितः ॥ गोर्भूम्यादेः पतिर्गोपतिः
रक्षो जगत इति गोप्ता ॥ स्वात्मानं मायया संवृणोतीति वा गोप्ता ॥ सकलकामाभिवर्षके अक्षिणी य
स्य स वृषभाक्षः ॥ वृषो धर्मो वा दृष्टिरस्येति वा वृषभाक्षः ॥ वृषभो धर्मः प्रियो यस्य स वृषप्रियः वा प्रियस्ये
निष्ठर्वनिपातविकल्पविधानात्परनिपातः ॥७८॥

गो॰
वि॰ टी॰
८९

देवासुरसंग्रामान्न निवर्तत इत्यनिवर्ती ॥ वृषप्रियत्वाद्धर्मान्न निवर्तत इत्यनिवर्ती ॥ स्वभावतो
विषयेभ्यो निवृत्त आत्मास्येति निवृत्तात्मा ॥ संहारकाले विस्तृतं जगत्सूक्ष्मरूपेण संक्षिपन्संक्षे
प्ता ॥ उपात्तस्य रक्षणं क्षेमं करोतीति क्षेमकृत् ॥ नामस्मृतिमात्रेण पावयन् शिवः ॥ इति नाम्नां
षट्शतं विवृतं ॥ ६०० ॥ श्रीवत्सलक्षणं चिह्नमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः ॥ श्री

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीव
त्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥ ६५ ॥ राम

स्य वक्षसि श्रीरनपायिनी वसतीति श्रीवासः ॥ अमृतमथने सर्वान्देवान् विहाय श्रीरेनं वर
यामासेति श्रीपतिः ॥ श्रीः पराशक्तिरस्याः पतिरिति वा श्रीपतिः ॥ परास्य शक्तिर्विविधैव श्रू
यत इति श्रुतेः ॥ विरिंचादीनां श्रीमतां ऋग्यजुःसामलक्षणा श्रीः सा येषां संति तेषां प्रधान राम
इति श्रीमतां वरः ॥ ऋचो यजूंषि सामानि सा हि श्रीरमृता सतामिति श्रुतेः ॥ ६५ ॥ राम ॥ राम ८९

श्रियं भक्तानां ददातीति श्रीदः ॥ श्रियः ईशः श्रीशः ॥ श्रीमत्सु नित्यं वसतीति श्रीनिवासः ॥ श्री
शक्तेन तद्वैतोल्लसंते ॥ सर्वशक्तिमयेऽस्मिन्नखिलाः श्रियो निधीयंत इति श्रीनिधिः ॥ कर्मानुरू
पेण विविधाः श्रियः सर्वभूतानां विभावयतीति श्रीविभावनः ॥ सर्वभूतानां जननीमीश्वरीं श्रियं
वक्षसा वहन् श्रीधरः ॥ स्मरतां स्तुवतां कीर्तयतां च श्रियं भक्तानां करोतीति श्रीकरः ॥ श्रेय अनपायि
सुखावाप्तिलक्षणं श्रेयः तच्च परस्य स्वरूपमिति श्रुतेः ॥ श्रियोऽस्य संतीति श्रीमान् ॥ त्रयाणां लो
कानामाश्रयत्वाल्लोकत्रयाश्रयः ॥ ६६ ॥ शोभने पुंडरीकाभे अक्षिणी अस्येति स्वक्षः ॥ शोभनान्यं

६: श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमांल्लो
कत्रयाश्रयः ॥ ६६ ॥ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजितात्मा विधेया
त्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६७ ॥

गान्यस्येति स्वंगः ॥ एक एव परानंदः उपाधिभेदाच्छतधाभिद्यत
इति शतानंदः ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ परमानंदविग्रहो नं
दिः ॥ ज्योतिर्गणानामीश्वरो ज्योतिर्गणेश्वरः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति
श्रुतेः ॥ विजितं मन आत्मा येन स विजितात्मा ॥ न केनापि विधेय आत्मा स्वरूपमस्येति अविधेयात्मा
सती अवितथा कीर्तिरस्येति सत्कीर्तिः ॥ करतलामलकवत्सर्वं साक्षात्कृतवतः क्वापि संशयो नास्तीति
छिन्नसंशयः ॥ ६७ ॥ ॥ राम

सर्वभूतेभ्यः समुद्रिक्तत्वादुदीर्णः ॥ सर्वतः सर्वं चैतन्येन पश्यतीति सर्वतश्चक्षुः ॥ विश्वतश्चक्षुरि
तिश्रुतेः ॥ न विद्यते स्येशोस्येत्यनीशः ॥ न तस्येश कश्चनेतिश्रुतेः ॥ शश्वद्भवन्नपि न विक्रियावत्त्वा
च्छाश्वत इति शाश्वतः स्थिर इति नामैकं ॥ ध्रुवत्वात् ॥ लंकां प्रति मार्गमन्वेषमाणः सागरं शरणं भूमौ
शेत इति भूशयः ॥ स्वेच्छयावतारैर्बहुभिर्भूमिं भूषयन् भूषणः ॥ भवनं सत्ता भूतिर्विभूतिर्वा समस्त
विभूतीनां कारणत्वाद्वा भूतिः ॥ विगतः शोको यस्य परमानं

उदीर्णः सर्वतश्चक्षुरनीशः
शाश्वतः स्थिरः ॥ भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ७७ ॥ अर्चिष्मानर्चि
तः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ७८ ॥ राम

दस्वरूपत्वाद्विशोकः ॥ स्मरणमात्रेण भक्तानां शोकं नाशयतीति शोकनाशनः ॥ ७७ ॥ अर्चिष्मतेनाद
यो येनार्चिष्मंतश्चंद्रसूर्यादयः स एव मुख्योर्चिष्मान् सर्वलोकार्चितैर्विरिंच्यादिभिरर्चित इत्यर्चितः ॥ कुं
भवत्सर्वं तस्मिन्प्रतीतिर्वा तत्कुंभः ॥ गुणत्रयातीततया विशुद्ध आत्मा इति विशुद्धात्मा ॥ स्मृतिमात्रेण विपा
पानां तपनाद्विशोधनः ॥ चतुर्व्यूहेष्वनिरुद्धः ॥ प्रतिरथः प्रतिपक्षो न विद्यत इत्यप्रतिरथः ॥ प्रद्युम्न

कालनेमिप्रमुखं हतवानिति कालनेमिनिहा ॥ शूरकुलोद्भवत्वात् शौरिः ॥ वीरः शूरः ॥ शूरजनानां वास
वादीनां शौर्यातिशयेन ईश्वर इति शूरजनेश्वरः ॥ त्रयाणां लोकानां अंतर्यामितया आत्मेति त्रिलोकात्
मा ॥ त्रयो लोका यस्मात् परमार्थतो न भिद्यंत इति वा त्रिलोकात्मा ॥ त्रयो लोकास्त्रिभुवनं अस्य वशे वर्तंत इति
त्रिलोकेशः ॥ केशसंज्ञिताः सूर्यादिसंक्रांताः अंशवः तद्वत्तया केशवः ॥ अंशवो ये प्रकाशंते

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ॥ त्रि
लोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ८२ ॥

मम ते केशसंज्ञिताः ॥ सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमा इति श्रीमहाभारते ॥ ब्रह्मविष्णु
शिवाख्याः शक्तयः केशसंज्ञिताः ॥ तद्वत्तया केशवः ॥ त्रयः केशानः मत्केशा वसुधातले इ
त्यादि केशशब्दः पर्यायत्वेन प्रयुक्तः ॥ को ब्रह्मेति समाख्यात ईशोहं सर्वदेहिनां आवां तवांशे
संभूतौ ततः केशवनामवानिति हरिवंशे ॥ केशिनं दैत्यं हतवानिति केशिहा ॥ संहेतुकसमा

धर्मादिपुरुषार्थचतुष्टयं वांछद्भिः काम्यत इति कामः ॥ कामश्चासौ देवश्चेति कामदेवः ॥ का
मिनां कामान्पालयतीति कामपालः ॥ पूर्णकामस्वभावत्वात्कामी ॥ कामोऽस्यास्तीति वासौ काम
यतेति श्रुतेः ॥ अभिरूपतमं देहं वहन्कांतः ॥ द्विपरार्द्धान्ते कस्य ब्रह्मणोऽप्यंतो यस्मादिति कां
तः कृतः आगमः श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः ॥ वेदाः शास्त्राणि विज्ञानमेतत्स
र्वं जनार्दनादिति ॥ श्रुतिस्मृती ममैवाज्ञे इति श्रीभगवद्वचनात्

कामदेवः कामपालः कामी कांतः कृतागमः ॥ अ
निर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥ ८३ ॥

इदं तदीदृशं वेति निर्देष्टुं यन्न शक्यते ॥ गुणादिहीनत्वाद्वपुरस्येति अनिर्देश्यवपुः ॥ रोदसी व्या
प्य कांतिरभ्यधिका स्थितास्येति विष्णुः ॥ गत्यादिमत्वाद्वीरः ॥ वीर गतिप्रजनकान्त्यशनखादने
ष्विति धातुपाठात् ॥ देशतः कालतो वस्तुतश्चापरिच्छिन्नोऽनंतः ॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेर्व
चनादनंतः ॥ यद्दिग्विजये प्रभूतं धनमजयदर्जुनस्तेन धनंजयोऽर्जुनः पाण्डवानां धनंजय इति भग

तपो वेदाश्च सत्यं च ज्ञानं च ब्रह्मसंज्ञितं ॥ तस्मै हितत्वाद्ब्रह्मण्यः ॥ तपआदीनां कर्तृत्वाद्ब्रह्मकृत्
ब्रह्मात्मना सर्वं सृजतीति ब्रह्मा ॥ बृहत्वाद्बृंहणत्वाच्च सत्यादिलक्षणं ब्रह्म ॥ सत्यं ज्ञानमनंतं ब्रह्मे
ति श्रुतेः ॥ प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरं ॥ वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमिति श्री
विष्णुपुराणे ॥ तपआदीनां विवर्द्धनः ब्रह्मविवर्द्धनः ॥ वेदं वेदार्थं च यथावद्वेत्तीति ब्रह्मवित् ॥ ब्रा

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्र
ह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४ ॥

ह्मात्मना समस्तानां प्रवचनं कुर्वन्वेदस्यायमिति ब्राह्मणः ॥ ब्रह्म संतिकास्तच्छेषभूता इति ब्रह्मी ॥ वेदा
न्स्वात्मभूतान्जानातीति ब्रह्मज्ञः ॥ ब्राह्मणानां प्रियो ब्राह्मणप्रियः ॥ ब्राह्मणाः प्रिया यस्येति वा ॥ घ्नं
तं शपंतं परुषं वदंतं यो ब्राह्मणं न प्रणमेद्यथाहं ॥ स पापकृद्ब्रह्मदवाग्निदग्धो वध्यश्च दंड्यश्च न चास्म
दीय इति श्रीभगवद्वचनात् ॥ यं देवं देवकी देवी वसुदेवादजीजनत् ॥ भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवा

ॐ
वि॰ टी॰
७२

महांतः पद्विक्षेपाः अस्येति महाक्रमः ॥ शं नो विष्णुरुरुक्रम इति श्रुतेः ॥ महत् जगदुत्पत्त्यादिकमस्ये
ति महाकर्मा ॥ यदीयेन तेजसा भास्करादयस्तेजस्विनस्तस्य महत्तेज इति महातेजाः ॥ महांश्चासावुर
गश्चेति महोरगः ॥ सर्पाणामस्मि वासुकिरिति भगवद्वचनात् ॥ महांश्चासौ क्रतुश्चेति महाक्रतुः ॥ य
था अश्वमेधः क्रतुराडिति स्तुतिवचनात् ॥ सोपि स एवेति श्रुतेः ॥ महांश्चासौ यज्वा लोकसंग्रहार्थं यज्ञान्नि
र्वर्तयन्महायज्वा ॥ महांश्चासौ यज्ञश्चेति महायज्ञः ॥ यज्ञानां जपयज्ञोस्मीति श्रीभगवद्वचनात् ॥ महच्च
तद्धविश्च ब्रह्मात्मनि सर्वं जगदात्मना हूयत इति महाहविः ॥ महाक्रमित्यादि बहुव्रीहिर्वा ॥ ८५ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥
८५ ॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्ति
रनामयः ॥ ८६ ॥

सर्वैः स्तूयते न स्तोता कस्यचिदिति स्तव्यः ॥ अत एव स्तवप्रियः ॥ येन स्तूयते न स्तोत्रं गुणसंकीर्तनात्म
कं तत्तु हरिरेव इति श्रुतेः ॥ स्तवनं क्रिया ॥ स्तोतापि स एव प्रियं रणमस्य ॥ यतः पंच महायुधानि धत्ते सत
ते लोकरक्षणार्थं ॥ अतो रणप्रियः ॥ सकलकामैः सकलाभिः शक्तिभिश्च संपन्न इति पूर्णः ॥ न केवलं पू
र्णः पूरयिता च ॥ सर्वेषां संपद्भिः स्मरणेन कल्मषाणि क्षपयतीति पुण्यः ॥ पुण्यकीर्तिरस्य यतः पु
ण्यमावहत्यस्य कीर्तिर्नृणामिति पुण्यकीर्तिः ॥ आंतर्बाह्यैः आधिभिः कामजैः नपीड्यते इत्यनामयः

राम
७२
८६

मनसो वेग इव वेगोस्य सर्वगत्वादिति मनोजवः ॥ चतुर्दशविद्यानां बाह्यविद्यासमयानां च प्रणे
ता वक्ता चेति तीर्थकरः ॥ हयग्रीवरूपेण मधुकैटभौ हत्वा विरिंचाय सर्गादौ सर्वाः श्रुतीः अन्याश्च
विद्याः उपादिशत् वेदबाह्या विद्याः सुरवैरिणां वंचनायोपादिशदिति पौराणिकाः कथयंति ॥
वसु सुवर्णं रेतो यस्येति वसुरेताः यास्वाद्यर्वमपस्सृष्ट्वा तासु वीर्यमवासृजत् ॥ तदंडमभवद्धैम
सहस्रांशुसमप्रभमिति श्रीव्यासवचनात् ॥ वसूनः कारणं परमिति वसुरेताः ॥ वसु धनं प्रकर्षे

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥ वसु
प्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७ ॥ राम

ण ददातीति साक्षाद्धनाध्यक्षोयमितरस्त्वस्मादाहुत्याध्यक्ष इति वसुप्रदः ॥ वसु प्रकर्षं मोक्षा
ख्यफलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः ॥ विज्ञानमानंदं ब्रह्म रातेर्दातुः परायणं तिष्ठ
मानस्य तद्विद इति श्रुतेः ॥ सुरारीणां वसूनि प्रक्षेपयित्वा वसुप्रदः ॥ वसुदेवस्यापत्यं वासुदे
वः ॥ वसंति भूतानि तत्र तेषु वसतीति वसुः ॥ अविशेषेण सर्वेषु विषयेषु तन्मनो वसतीति वसुः ॥
तन्मनोस्तीति वसुमनाः ॥ ब्रह्महविरिति भगवद्वचनाद्धविः ॥ ८७ ॥ रामेजयति ॥ राम

ॐ
वि॰दी॰
५३

श्रुतिब्रह्मेति चेद् इदं सेन तमेनं ततो विदुरिति श्रुतेः ॥ ब्रह्मास्मीति ये विदुस्ते सं तस्तैः प्राप्यत इति सद्ग
तिः सती गतिः बुद्धिः सत्कृतस्यास्योतिवास सद्भूतिः ॥ सती कृतिर्जगद्रक्षालक्षणास्य यस्मात्तेन सत्कृ
तिः इति सत्तासप्तमं शतं ॥ ७०० ॥ सजातीयविजातीयस्वगतभेदरहिता ॥ एकमेवाद्वितीयमिति
श्रुतेः ॥ स एव परमात्मा चिदात्मको बोधाद्यासमानत्वात्सद्भूतिः ॥ नानात्वप्रतीतेर्बाध्यमानत्वाद्

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ॥ शू
रसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ८८ ॥ राम

सत्सु सत्प्रयोगो यौगिको वा बाधः प्रपंचस्य विवक्षितः ॥ सतां तत्त्वविदां प्रकृष्टमयनमिति सत्परा
यणः ॥ हनुमत्प्रमुखाः ॥ सैनिकाः शौर्यशालिनो यस्य सेना या सा शूरा सेना यस्य स शूरसेनः ॥ राम
यदूनां प्रधानत्वाद्यदुश्रेष्ठः सतां विदुषां आश्रयः सन्निवासः ॥ शोभना यामुना यमुनासंबंधिनः ५३
परिवेष्टारोस्येति सुयामुनः ॥ गोपवेषधरा यमुना परिवेष्टारः पद्मासनादयः शोभना दुतिवास्य वा मुनः ८८

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ॥ दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ८९ ॥

विश्वमूर्तिर्यस्य सः सर्वात्मकत्वादिति विश्वमूर्तिः ॥ शेषांकपर्यंकशायिनो निरुद्धस्य महती मूर्तिरिति म
हामूर्तिः ज्ञानमयी स्वेच्छया तेजसी मूर्तिर्दीप्तास्येति दीप्तमूर्तिः ॥ कर्मबंधनामूर्तिरस्य न विद्यत इत्यमूर्ति
मान् ॥ अवतारेषु स्वेच्छया लोकानामुपकारिणी बह्वीर्मूर्तीर्भजत इत्यनेकमूर्तिः ॥ यद्यप्यनेकमू
र्तित्वं तथाप्येष मीदृश इति न व्यज्यत इत्यव्यक्तः ॥ नानाविकल्पयाद्भुतं यः सविद्याकृतेः सती शतमूर्ति
विश्वादिमूर्तित्वं यतोत एव शतानन ॥ ९० ॥ परमार्थतः सजातीयविजातीयस्वगतभेदविनिर्मुक्तत्वादेकः ॥
एकमेवाद्वितीयमिति श्रुतेः ॥ मायया नेकरूपत्वान्नैकः ॥ इंद्रो मायाभिः पुरुरूप ईयते ॥ सोमो यज्ञाभिह
पतेसोधरः सव ॥ कः शाह्वः सुखवाचकत्वेन स्तूयत इति कः ॥ कं ब्रह्मेति श्रुतेः ॥ तदेव पुरुषार्थत्वरूपत्वा

भूतावास
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ९०
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१ ॥

इत्येव विचार्यमिति किं ॥ यत्तद् नस्वतः सिद्धं वस्तु तद् रूपवाचिना ब्रह्मनिर्दिश्यत इति ब्रह्मयत् ॥ यतो
वा इमानि भूतानि जायंत इति श्रुतेः ॥ ततो नीतिब्रह्मतत्तु ॥ येन तस्माद् नितिहेतोर्ब्रह्मणोविषयः स्व
नइति श्रीभगवद्वचनात् ॥ पद्यते मुमुक्षुभिरिति पदं ॥ यस्मादुत्कृष्टं नास्ति तदनुत्तमं ॥ सविशेषमेकं
नाम पदमनुत्तममिति ॥ आधारभूते स्मिन् सकला लोका बध्यंत इति लोकानां बंधुः लोकबंधुः ॥ लो
कानां जनकत्वात् न नकोपमो बंधुरस्य हिता हितोपदेशाश्रुतिस्मृतिलक्षणात् कृतवानिति वा लोकबं
धुः ॥ लोकैर्नाथ्यते याच्यते तेनानुरूपपंक्ता शास्ति तेषां लोकानामीष्ट इति लोकनाथः ॥ नाधनाद्याचाप
नाथेश्वर्याश्रीश्विति धातुपाठात् ॥ लोकैर्याच्यते प्रार्थ्यत इति वा लोकनाथः ॥ मधुकुलजातत्वान्माधवः

[illegible]

ग्रं
वि॰टी॰
७७

सुवर्णमिव वर्णो यस्येति सुवर्णवर्णः॥ यथा पश्यः पश्यते रुक्मवर्णमिति श्रुतेः॥ हेमवदंगं य
स्येति हेमांगः॥ यश्चैषोन्तरादित्ये हिरण्मयः पुरुष इत्यादिश्रुतेः॥ वराणि शोभनान्यंगान्यस्येति वरांगः॥
चंदनैराह्लादनैरंगदैः केयूरैर्भूषितत्वाच्चंदनांगदी॥ वीरान्हिरण्यकशिपुप्रभृतीन्नागादीश्च
हंतीति वीरहा॥ समो नास्ति विद्यते इति सर्वविलक्षणत्वाद्विषमः॥ नत्वत्समोस्त्यभ्यधिकः कुतोन्य
इति भगवद्वचनात् सर्वविशेषरहितत्वाच्छून्यवत् शून्यः॥ घृता विगलिता आशिषः शायनास्य
स घृताशीः॥ न स्वरूपान्न सामर्थ्यान्न च ज्ञानादिकारणाच्चलनं विद्यत इत्यचलः॥ कीर्तितोच्युतः

सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी॥ वीरहा विषमः शून्यो घृताशीरचलश्चलः
७२॥ अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्॥ सुमेधा मेधजो धन्यः सत्यमे
धा धराधरः॥ ७३॥

वायुरूपेण चलतीति चलः॥ ७२॥ अनात्मवस्तुष्वात्माभिमानो नास्ति
स्वच्छसंवेदनाकृतेरित्यमानी॥ स्वमायया सर्वेषां मनात्मस्वाभिमानं ददाति भक्तानां सत्कार
मानं च ददातीति॥ अथ धर्मिष्ठानां सत्कारं वयति॥ तत्त्वविदामनात्मनि आत्माभिमानं खंडयतीति मा
नदः॥ सर्वैः पूजनीय इति सर्वेश्वरत्वादिति मान्यः॥ चतुर्दशानां लोकानामीश्वरत्वाल्लोकस्वामी॥
त्रींल्लोकान्धारयतीति त्रिलोकधृक्॥ शोभनास्याभाविक्रा मेधास्येति सुमेधाः॥ नित्यमसिच्प्रजा
मेधयोरिति समासांतोसिच्प्रत्ययः॥ मेधे धर्मे जायत इति मेधजः॥ कृतार्थो धन्यः॥ सत्याश्चावितथा राम
मेधास्येति सत्यमेधाः॥ अंशैः शेषाद्यैः शेषो धराधारयतीति धराधरः॥ ७३॥ रामायनमः ७७

तेजांसि अंभांसि सर्वदा ह्यादित्यरूपेण वर्षतीति तेजोवृषः॥ द्युतिमंगगतां कांतिं धारयतीति
द्युतिधरः॥ सर्वशस्त्रभृतां श्रेष्ठ इति सर्वशस्त्रभृतां वरः॥ भक्तैरुपहृतं पत्रपुष्पादिकं प्रगृह्णा
तीति प्रग्रहः॥ धावतो विषयारण्ये दुर्दांतेंद्रियवाजिनः॥ नन्वसादेन रश्मिनेव वध्नातीति वा प्रग्र
हवत्प्रग्रहः॥ प्रग्रहो रश्मौ वा इति पाणिनिवचनात्॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः॥ प्र
ग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः॥ ७४॥

प्रग्रहस्येति शब्दस्य साधुत्वं॥ स्वभावेन सर्वाणि निगृह्णातीति निग्रहः॥ विगतमग्रमंतो विनाशो
स्येति व्यग्रः॥ भक्तजनाभीष्टप्रदाने व्यग्र इति वा व्यग्रः॥ चत्वारः शृंगा नैकशृंगः॥ चत्वारि शृंगा त्र
यो अस्य पादा इति मंत्रवर्णात्॥ निगदेन मंत्रेणाग्रे जायत इति निगादस्य लोपं कृत्वा गदाग्रजः॥ गदो ७८
नाम श्रीवासुदेवस्यावरजस्तस्मादग्रे जायत इति वा गदाग्रजः

चतस्रो मूर्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्येति चतुर्मूर्तिः ॥ चत्वारो बाहवोऽस्येति चतुर्बा
हुः इति वासुदेवे रूढः ॥ शारीरपुरुषः छंदःपुरुषो वेदपुरुषो महापुरुष इति बह्वृचोपनिष
दुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति चतुर्व्यूहः चतुर्णामाश्रमाणां वर्णानां च यथोक्तकारिणां

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

गतिश्चतुर्गतिः ॥ रागद्वेषादिरहितं चतुरं मन आत्मा अस्य मनोबुद्धिरहंकारश्चित्तं चतुष्टयं आ
त्मा यस्येति वा चतुरात्मा ॥ धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयं भवति उत्पद्यतेऽस्मादिति चतु
र्भावः ॥ यथावद्वेत्ति चतुर्णां वेदानामर्थमिति चतुर्वेदवित् ॥ एकः पादोऽस्येति एकपात् ॥ पादो

[illegible]

संसारचक्रस्य सम्यगावर्तक इति समावर्तः ॥ सर्वत्र वर्तमानत्वान्न निवृत्तः क्वापि आत्मा निवृ
त्तात्मा निवृत्त आत्मा विषयेभ्य इति निवृत्तात्मा ॥ जेतुं न शक्यत इति दुर्जयः ॥ भयहेतुत्वादस्या
ज्ञां नातिक्रामंतीति दुरतिक्रमः ॥ भयादस्माद्वातः पवते भयात्तपति सूर्यः ॥ भयादिंद्रश्च वायु
श्च मृत्युर्धावति पंचमः इति मंत्रवर्णात् ॥ दुर्लभया भक्त्या लभ्यत्वाद्दुर्लभः ॥ जन्मांतरसहस्रेषु
तपोध्यानसमाधिभिः ॥ नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते इति वचनात् भक्त्या लभ्य
स्त्वनन्ययेति भगवद्वचनात् दुःखेन गम्यते ज्ञायत इति दुर्गमः ॥ अंतरायप्रतिहतैर्दुःखादि
वाप्यत इति दुर्गः ॥ दुःखेनावास्यते चित्ते योगिभिः समाधाविति दुरावासः ॥ दुरारिणो दुर्गामिनो

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ॥ दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारि
हा ॥ ८९ ॥ शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ॥ इंद्रकर्मा महाकर्मा कृतक
र्मा कृतागमः ॥ ९० ॥

दानवादयः तान् हंतीति दुरारिहा ॥ ८९ ॥ शोभनैरंगैर्ध्येयत्वाच्छुभांगः ॥ लोकानां सारं सारंगवद्गृह्णा
तीति लोकसारंगः प्रणवः तेन प्रतिपत्तव्य इति लोकसारंगः पृषोदरादित्वात्साधुत्वं ॥ प्रजापतिर्लोका
नाभ्युपादत्ते इति श्रुतेः ॥ शोभनस्तंतुर्विस्तीर्णः प्रपंचोऽस्येति सुतंतुः ॥ तमेव तंतुं वर्धयतीति छेदयतीति
तंतुवर्धनः ॥ इंद्रकर्मेवास्य कर्मेति इंद्रकर्मा ऐश्वर्यकर्मेत्यर्थः ॥ महांति वियदादीनि भूतानि कर्माणि
कार्याणि अस्येति महाकर्मा ॥ कृतमेव न कर्तव्यं किंचित्कर्मास्य विद्यत इति कृतकर्मा ॥ धर्मात्मकं कर्म
कृतवानिति कृतकर्मा वा ॥ कृतो वेदात्मक आगमोऽस्येति कृतागमः ॥ अस्य महतो भूतस्य निश्वसितमेत

[illegible]

ॐ
वि·टी·
७९

उत्कृष्टं जन्म स्वेच्छया भजत इति उद्भवः ॥ उद्गतं भवं अपगतं जन्म अस्य समस्तकारणत्वादिति वा उद्भवः ॥
विश्वातिशायिसौभाग्यशालित्वात्सुंदरः ॥ सुष्ठु उंदतीति सुंदः ॥ स्वपादरादिन्चात्मरूपं ॥ आर्द्रीभा-
वस्य वाचकः सुंदः करुणाकर इत्यर्थः ॥ रत्नशब्देन शोभालक्षणे ॥ रत्नवत्सुंदरा नाभिरस्येति रत्ननाभः ॥
शोभने नयने ज्ञाने चास्येति सुलोचनः ॥ ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वादर्कः ॥ वाजमन्नमर्थि-

उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अ-
र्को वाजसनः शृंगी जयंतः सर्वविज्जयी ॥ ७८ ॥

नां सुनोति ददातीति वाजसनः ॥ प्रलयांभसि शृंगवान् मत्स्यविशेषरूपी शृंगी मत्स्यो वेति
श्रायते ॥ अरीनतिशयेन जयतीति जयंतः जयहेतुर्वा जयंतः ॥ सर्वं विषयं ज्ञानमस्येति सर्ववित् अभ्यं-
तरान् रागादीन् बाह्यान् हिरण्याक्षादीन् जेतुं शीलमस्येति जयी ॥ मनोरिति रित्यधिकारे तद्व-
द्वीन्यादिणिनि वचनान् इनि प्रत्ययः ॥ सर्वविच्चासौ जयी चेत्येकं नाम ॥ ७८ ॥ रामेत्युति ॥ राम
७९

विंदवोऽवयवाः सुवर्णसदृशाः अस्येति सुवर्णबिंदुः ॥ आप्रणखात्सर्व एव सुवर्ण इति श्रुतेः ॥ शोभ-
नो वर्णः सुवर्णः अक्षरं बिंदुश्चाप्यस्मिन्मंत्रे स मंत्रात्मा वा सुवर्णबिंदुः ॥ तान मष्टमंत्रा ज्ञा विदुः ॥ ८० ॥
रागद्वेषादिभिः शब्दादिभिर्विषयैस्त्रिदशारिभिश्च न क्षोभ्यत इति अक्षोभ्यः ॥ सर्वेषां वागीश्वराणां

सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ म-
हाह्रदो महागर्तो महाभूतो महानिधिः ॥ ७९ ॥

ब्रह्मादीनामपीश्वरः सर्ववागीश्वरेश्वरः ॥ अवगाह्य तदानंदं विश्रम्य सुखमासते योगिनः ॥ इति मह-
त्ति महाह्रद इव महाह्रदः ॥ गर्तवत्तस्य माया महती दुरत्ययेति महागर्तः ॥ मम माया दुरत्ययेति
भगवद्वचनात् ॥ अथवा गर्तशब्दो रथपर्याय इति नैरुक्ताः तस्मान्महारथो महागर्तः ॥ महारथत्वम-
स्य प्रसिद्धं भारतादिषु ॥ कालत्रयावच्छिन्नस्वभावत्वान्महाभूतः ॥ सर्वभूतान्यस्मिन्निधीयंत इति महांश्चा

कुं धरणीं भारावतारणं कुर्वन् मोदयतीति कुमुदः ॥ सुदिरत्नं निर्जितः ॥ कुंदपुष्पतुल्यानि शुद्धानि
फलानि राति ददातीति कुंदरः कुन्दपुष्पतुल्यानि शुद्धानि फलानि शृणाति ददातीति रलयोरैक्यात् कंदस्मरणात्
कुंदरः ॥ कुं धरां दारयामास हिरण्याक्षजिघांसया ॥ वाराहं रूपमास्थायेति वा कुंदरः ॥ कुंदोपमसुंदरांग
त्वात् स्वच्छस्फटिकवन्निर्मलत्वादिति कुंदः ॥ कुं दां कश्यपाय ददातीति वा कुंदः ॥ सर्वपापविनाशाय वा
जिमेधेन वेष्टवान् ॥ तस्मिन् यज्ञे महानादे दक्षिणां भृगुनंदनः ॥ मारीचाय ददौ प्रीतः कश्यपाय वसुंधरा
मिति हरिवंशे ॥ कुं पृथिवीं खंडयतीति वा कुंदः ॥ कुंशब्देन पृथ्वी ... नितां ... यश्चकार

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः ॥
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८० ॥

... मर्दिनी मूने केशा वाङ् वर्तन्त यांकिन त्व ॥ यः कार्त्तवीर्यस्य भार्गवो न्नमः इति विष्णुधर्मे ॥ पर्जन्य
वद्धाध्यात्मिकादितापत्रयं शमयतीति सर्वकामानभिवर्षतीति वा पर्जन्यः ॥ स्मरणमात्रेण पुनातीति
पावनः इलातीति प्रेरणां करोतीति इलः न इलः अनिलः ॥ इलनं स्वपितीत्यतः इलः नास्ति परिणति
स्य शक्तिस्वरूपत्वादनिलो वा ॥ अथवा अनिले गहनार्थालक प्रत्यया नत्वं ॥ अगहनो वा अनिलः स्वात्मा
मृतरसमश्नातीत्यमृताशः ॥ स्वरूपानंदतुभवादमृताशः ॥ मथितममृतं सुरान्पाययित्वा स्वयं चाश्नाती
त्यमृताशः ॥ अमृताश्नन्नश्वरः ॥ अविनश्वरस्वफलत्वेन वा काश्यपश्य तस्मिन्मृताशः ॥ मृतं मरणं न

पत्रपुष्पादिभिर्भक्तिमात्रसमर्पितैः सुलभ इति सुलभः ॥ पत्रेषु पुष्पेषु फलेषु तोयेष्वक्री
तलभ्येषु सदैव सत्सु भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्न इति श्री महाभारते ॥ शो
भनं व्रतमस्य नियतोऽभोजननिवर्त्तनं वा सुव्रतः ॥ अनन्याधीनसिद्धत्वात् सिद्धः ॥ सुरशत्रूणामेवाचाश
त्रवस्तान् जयतीति शत्रुजित् ॥ तापनान्मुरशत्रूणां शत्रुतापनः ॥ न्यक् अर्वाक् रोहतीति सर्वेषामुप
रिवर्तमान इति न्यग्रोधः पृषोदरादित्वान्नह कारस्य दकारादेशः ॥ सर्वाणि भूतानि न्यक्कृत्य नि

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ॥
न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८१ ॥

जमायया अवृणोतीति वा न्यग्रोधः ॥ अंबरादूर्ध्वः कारणत्वेनेति उदुंबरः ॥ पृषोदरादि
त्वादेव उकारादेशः ॥ ऊर्जमन्नेनात्मना विश्वं पोषयन् उदुंबरः ॥ ऊर्ज्जमन्नाद्य उदुंबर इति श्रुतेः ॥ श्वो
ऽपि न स्थाता इत्यश्वत्थः ॥ पृषोदरादित्वात् सकारस्य तकारः ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययमि
ति श्रीभगवद्वचनात् ॥ ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातन इति श्रुतेः ॥ चाणूरनामानं अंध्रं निह

जे वि. टी. ८७

राम ८७

ॐ
वि॰टी॰
७८

अनंतान्यर्चींषि यस्य सः सहस्रार्चिः ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः इति भगवद्गीतासु सप्त जिह्वा अस्य संतीति सप्तजिह्वः कालीकराली च मनोजवा च सुधूम्रवर्णा च सुलोहिता च ॥ स्फुलिंगिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वा इति मुंडके सप्त एधांसि दीप्तयोऽस्येति सप्तैधा अग्निः ॥ सप्त ते अग्ने समिधः सप्त जिह्वा इति मंत्रवर्णात् ॥ सप्ताश्वाः वाहनान्यस्येति सप्तवाहनः सप्तनामा एको अश्वो वाहनमस्येति सप्तवाहनः आदित्यः ॥ एको अश्वो वहति सप्तनामेति श्रुतेः ॥ मूर्तिर्घनरूपधारणसामर्थ्यं चराचरल

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥
अमूर्त्तिरनघोचिंत्यो भयकृद्भयनाशनः ॥९२

क्षणं ॥ नाभ्यो मितन्न सा भ्यो मूर्तिरजायतेति श्रुतेः तद्रहिता अथवा देहसंस्थानलक्षणा मूर्तिः सावयवा मूर्तिर्नास्य विद्यत इति अमूर्तिः ॥ अघं दुःखं पापं चास्य न विद्यत इत्यनघः ॥ प्रमाणादिसाद्वित्वेन सर्वप्रमाणागोचरत्वादचिंत्यः ॥ अयमीदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वाद्वा अचिंत्यः ॥ असन्मार्गवर्तिनां भयं करोतीति भयकृत् ॥ भक्तानां भयं निकृंततीति कृणोतीति वा भयकृत् ॥ वर्णाश्रमाचारवतां भयं नाशयतीति भयनाशनः ॥ वर्णाश्रमाचारवता पुरुषेण परः पुमान् ॥ विष्णुराराध्यते पंथा नान्यस्तत्तोषकारकः इति श्रीविष्णुपुराणवचनात्तेनारा

धितत्वाद्भयं नाशयतीति भयनाशनः ॥९२

राम
७८

सौक्ष्म्यातिशयशालित्वादणुः ॥ एषोऽणुरात्मा चेतसा वेदितव्य इति मंत्रवर्णात् ॥ बृहत्त्वाद्बृंहणत्वाच्च ब्रह्म बृहत् ॥ अस्थूलमित्यादिना द्रव्यत्वप्रतिषेधात्कृशः ॥ स्थूल इत्युपचर्यते ॥ सर्वात्मत्वात्स्थूलः ॥ सत्त्वरजस्तमसां सृष्टिस्थितिलयकर्मस्वधिष्ठातृत्वाद्गुणभृत् ॥ परमार्थतो गुणाभावान्निर्गुणः ॥ साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः ॥ शब्दादिगुणहीनत्वादतिनिरतिशयसूक्ष्मत्वान्नित्यशुद्धबुद्धसर्वगतत्वादिना नप्रतिबंधकधर्मज्ञानतर्कैश्चापि स एव महान् ॥ अशब्दमस्पर्शं महान्तं श्रुतिविशेषात्

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ॥९३

न केवलं स्वरूपेण ॥ पृथिव्यादीनां धारकाणामपि धारकत्वान्न केनचिद्ध्रियत इत्यधृतः ॥ यद्येवं स्वयं केन धार्यत इत्याशंकायामात्मनैवात्मानं धारयतीति स्वधृतः ॥ स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति श्रुतेः ॥ पद्मोदरदलताम्रमभिरूपतममस्यास्यमिति स्वास्यः ॥ वेदात्मको महान्शब्दराशिरस्य मुखान्निर्गतः पुरुषार्थोपदेशार्थमिव वा स्वास्यः ॥ अस्य महतो भूतस्य निःश्वसितमेतदृग्वेद इति श्रुतेः ॥ अन्यं वंशमस्य वंशो नावरः ॥ प्राग्वंशः ॥ अस्य वंशः प्रपंचः सर्ववंशाग्रे वर्तमानत्वादिति प्राग्वं

शः ॥ वंशे प्रपंचं वर्द्धयन् छेदयन्वा वंशवर्द्धनः ॥
॥१०३॥

भेन रूपेण ध्रुवो भारं बिभर्तीति भारभृत्‌ ॥ वेदादिभिरयमेव परत्वेन कथितः ॥ सर्वैर्वेदैः कथित इति
वा कथितः ॥ सर्वे वेदा यत्पदमामनंति ॥ वेदैश्च सर्वैरहमेव वेद्यः ॥ वेदे रामायणे चैव पुराणे भारते
तथा ॥ आदावंते च मध्ये च विष्णुः सर्वत्र गीयते इत्यादि वचनाच्च ॥ सो ऽध्वनः पारमाप्नोति तद्विष्णोः प
रमं पदमित्युक्तेः ॥ किं तदध्वनः पारं विष्णोर्व्यापनशीलस्य परमं पदमिति सतत्त्वमित्यपेक्षया
इंद्रियादिभ्यः सर्वेभ्यः प्रतिपाद्यते ॥ इंद्रियेभ्यः परा ह्यर्था इत्यारभ्य पुरुषान्न परं किंचित्सा काष्ठा

भारभृत्कथितो योगी योगीशः सर्वकामदः ॥ ७ ॥
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥

सा परा गतिरित्यंतेन च यः कथितः सः ॥ योगो ज्ञानं तेनैव गम्यत्वाद्योगी ॥ योगः समाधिः स हि स्वा
त्मनि सर्वदा समाधत्ते स्वात्मानं तेन वा योगी ॥ अन्ये योगिनो नश्यंति तेनंततस्वरूपात्समाधे
ति ॥ अयं तु न तद्विहितत्वात्तेषामीशः सर्वान्कामांश्च ददातीति सर्वकामदः ॥ फलमत उपपत्तेरि
ति श्रीभगवता श्रीवेदव्यासेनाभिहितत्वात्‌ आश्रमवत्सर्वेषां संसारारण्ये भ्रमतां विश्रामस्थान
त्वादाश्रमः ॥ अविवेकिनः संतापयतीति श्रमणः ॥ क्षामाः क्षीणाः प्रजाः सर्वाः करोतीति तत्कर
तीति क्षामश्चेष्ट इति लिपिपचाद्यचि कृते सुपर्णः ॥ छंदांसि शोभनानि पर्णानि छंदांसि संसारतरुरू

श्रीरामनामा धनुः श्रीमद्धारयामासेति धनुर्धरः स एव दाशरथिः ॥ धनुर्वेदं वेत्तीति धनुर्वेदः ॥ दम
नं दमयिता दंडः ॥ दंडो दमयतामस्मीति श्रीभगवद्वचनात्‌ ॥ वैवस्वतनरेंद्रादिरूपेण प्रजानां दम
यितेति दमयिता ॥ दमो दंडकार्यं फलं तच्च स एवेति दमः ॥ शत्रुभिर्न पराजित इत्यपराजितः ॥ सर्वक
र्मसु समर्थ इति सर्वसहः ॥ सर्वान् शत्रून्सहत इति वा सर्वसहः ॥ सर्वान्स्वेषु कृत्येषु व्यवस्थाप
यतीति नियंता ॥ नियमो नियतिस्तस्य न विद्यत इति वा नियमः ॥ सर्वे नियंतुर्नियंत्रणस्वभावा
त् ॥ नस्य विद्यते यमो मृत्युरिति अयमः ॥ अयं वा यम इति यमो नियमो योगांगेन ध्यानत्वात्स

धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ॥ अपराजितः सर्वसहो नियंता नियमो
यमः ॥ २ ॥ सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ॥ अभिप्रायः प्रियार्होऽर्हः
प्रियकृत्प्रीतिवर्धनः ॥ ८ ॥

एवं नियमो यमः ॥ २ ॥ शौर्यवीर्यादि सत्त्वमस्येति सत्त्ववान्‌ ॥ स
त्त्वगुणप्राधान्येन स्थित इति सात्त्विकः ॥ सत्सु साधुत्वात्सत्यः ॥ सत्यं यथाभूतार्थकथनं धर्मं च चोद
नालक्षणो नियत इति सत्यधर्मपरायणः ॥ अभिप्रेतः पुरुषार्थकांक्षिभिराभिमुख्येन प्रलयो ऽस्मिन्प्रय
न इति जगदिति वा अभिप्रायः ॥ प्रियाणीष्टान्यर्हतीति प्रियार्हः ॥ यद्यदिष्टतमं लोके यच्चास्य दयितं
महत्‌ ॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छतेति स्मरणात्‌ ॥ पूजाप्रशंसास्तुतिनमस्कारसाधनादिभिः पू
जनीयः साधनीय इत्यर्हः ॥ केवलं प्रियार्ह एव स्तुत्यादिभिर्भजतां प्रियं करोतीति प्रियकृत्‌ ॥ तेषामेव प्रीतिं

ॐ वि॰ टी॰ ५०

विहायसं विहायः गतिराश्रयोस्येति विहायसगतिः ॥ विष्णुपदमादित्यो वा स्वत एव द्योतत इति ज्योतिः ॥ ना-
रायणपरो ज्योतिरिति श्रुतेः ॥ शोभना द्युतिर्दीप्तिरिच्छा वास्येति सुरुचिः ॥ समस्तदेवतोद्देशेन प्रहुतमपि
कर्म हुतं तद्भुनक्तीति वा हुतभुक् ॥ सर्वत्र वर्तनात् व्याप्त्या लोकानां प्रभुत्वाद्विभुः ॥ रविरादित्यात्मा ॥ वि-
विधं रोचत इति विरोचनः ॥ सूते सुवते वा सूर्यः शब्दो निपातितो ॥ राजसूयसूर्यमृषोद्येत्यादिपाणिनि-
वचनात् सर्वं जगतः प्रसविता ॥ रविर्लोचनं चक्षुरस्येति रविलोचनः ॥ अग्निर्मूर्धा चक्षुषी चन्द्रसूर्याविति
मन्त्रवर्णात् ॥ ७ ॥ नित्यत्वात्सर्वगत्वाद्देशकालपरिच्छेदाभावादनन्तः ॥ हुतं भुनक्तीति हुतभुक् ॥ भुङ्क्ते इति

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सविता रवि-
लोचनः ॥ ७ ॥ अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ॥ अनिर्विण्णः सदामर्षी
लोकाधिष्ठानमद्भुतः ॥ ८ ॥

योग्यामचेतनां भुङ्क्ते इति भोक्ता ॥ जगत्पालयतीति वा भोक्ता ॥ सुखं मोक्षलक्षणं ददातीत्यसुखं खण्डय-
तीति वा सुखदः ॥ धर्मगुप्तये असकृज्जायमानत्वान्नैकजः ॥ अग्रे जात इत्यग्रजः ॥ हिरण्यगर्भः समवर्त-
ताग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः ॥ अवाप्तसकलकामत्वादवाप्तिहेत्वभावान्निर्वेदोस्य नास्ती-
त्यनिर्विण्णः ॥ साधून्सतः आभिमुख्येन मृष्यत इति सदामर्षी ॥ तमनाधारमाधारमधिष्ठाय त्र-
यो लोकास्तिष्ठन्तीति लोकाधिष्ठानं ब्रह्माद्भुतः श्रवणायापि वाङ्भिधानलभ्यः स्वरूपेणापि बलवीर्य

राम ५

सनातनादितिनिपातः ॥ सुचिरार्थवचनः कालः सनातनपरस्यैवेति कल्पनाकापि ॥ परस्य ब्रह्मणो रूपं पुरुषः प्रथ-
मं द्विज व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापर इति श्रीविष्णुपुराणे ॥ सर्वकारणत्वाद्धिरण्यगर्भादीनामपि
सनातनानां सनातनत्वात्सनातनतमः ॥ वडवानलस्य कपिलो वर्ण इति कपिलः ॥ कं जलं र-
श्मिभिः पिबन् कपिः ॥ वराहो वा कपिः ॥ कपिर्वराहः श्रेष्ठश्चेति वचनात् ॥ अप्येति यस्मिन्प्रलये
जगदित्यप्ययः ॥ इति नाम्नां नवमं शतं विवृतं ॥ ९०० ॥ भक्तानां स्वस्ति मंगलं ददातीति स्वस्तिदः ॥

सनातनसनातनतमः कपिलः कपिरप्ययः ॥ स्वस्ति-
दः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ४ ॥

तदेव करोतीति स्वस्तिकृत् ॥ मंगलस्वरूपमात्मीयं परमानन्दलक्षणं स्वस्ति तदेव भुङ्क्ते इति स्वस्तिभु-
क् ॥ भक्तानां स्वस्ति मंगलं भुनक्तीति वा स्वस्तिभुक् ॥ स्वस्तिरूपेण दक्षते वर्धते शीघ्रं स्वस्ति दातुं सम-
र्थो दक्षिण इति स्वस्तिदक्षिणः ॥ दक्षिणशब्दः आशुकारिणि वर्तते ॥ शीघ्रं स्वस्ति दातुमयमेव स-
मर्थो यतः ॥ स्मरणादेव कृष्णस्य सम्पदो मुक्तये सर्वसिद्धयः ॥ स्मृते सकलकल्याणभाजनं यत्र जायते
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ स्मरणादेव कृष्णस्य पापसंघातपञ्जरम् ॥ शतधा भेदमायाति गि-

श्री
वि.सी.
५२

कर्म रौद्रं कामः कोपश्च रौद्रं त्रयमस्य नास्ति स्ववाप्तसर्वकामत्वेन रागद्वेषाद्यभावादिति अरौद्रः॥
शेषरूपभाक् कुंडली॥ सहस्रांशुमंडलोपमकुंडलधारणाद्वा कुंडली॥ समस्तलोकरक्षणार्थं मनस्त
त्त्वात्मकं सुदर्शनाख्यं चक्रं धत्ते इति चक्री॥ विक्रमः पदन्यासः शौर्यं वा द्वयमशेषपुरुषेभ्यो विल
क्षणमस्यास्तीति विक्रमी॥ श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति ऊर्जितशासनः॥ शब्दप्रवृत्तिहे
तूनां जात्यादीनामसंभवात्॥ शब्देन वक्तुमशक्यत्वाच्छब्दातिगः॥ यतो वाचो निवर्तन्ते इति श्रुतेः॥ न

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः॥ शब्दा
तिगः शब्दसहः शिशिरः शर्वरीकरः॥ ७०॥ राम

शब्दगोचरं यस्य योगिध्येयं परं पदमित्यादिस्मृतिभ्यः॥ तमेव सर्वे वेदास्तात्पर्येण वदन्तीति शब्द
सहः॥ सर्वे वेदा यत्पदमामनन्तीति श्रुतेः॥ वेदैश्च सर्वैरहमेव वेद्य इति स्मृतेश्च॥ तापत्रयाभित
प्तानां विश्रामस्थानत्वात् शिशिरः॥ संसारिणामात्मा शर्वरीवत् शर्वरी ज्ञानिनां तु नः संसारः शर्वरी
तामुभयेषां करोतीति शर्वरीकरः॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूता

निःसाक्षित्वाप्यसतोऽस्त्येनेति श्रीभगवद्वचनात्॥ ॥१०॥

राम
५२

क्रौर्यं नाम मनोधर्मः कोपजः अवाप्तसर्वकामत्वात्कामाभावादेव कोपाभावस्तस्मात्क्रौर्यं ना
स्तीति अक्रूरः॥ कर्मणा मनसा वाचापि पेशलत्वात्पेशलः॥ प्रवृद्धः शक्तः शीघ्रकारी च दक्षः त्रयं च
एकस्मिन्नियतमिति दक्षः॥ दक्षिणशब्दस्यापि दक्षशब्दवदर्थः॥ पुनरुक्तिदोषो नास्ति शब्दभेदात्॥
अथवा दक्षते गच्छति हिनस्तीति वा दक्षिणः॥ दक्ष गतिहिंसनयोरिति धातुपाठात्॥ क्षमावतां योगि
नां पृथिव्यादीनां धारकः श्रेष्ठ इति क्षमिणां वरः॥ क्षमया पृथिवीसम इति वाल्मीकिवचनात्॥ ब्रह्मा
ण्डमखिलं वहन् पृथिवीव भारेणाग्लानिरिति पृथिव्याश्च वरः॥ क्षमिणः शक्ताः अयं तु सर्वशक्तित्वा

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः॥ वि
द्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः॥ ७१॥

त्सकलाः क्रियाः कर्तुं क्षमत इति वा क्षमिणां वरः॥ निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्ति ने
तरेषामिति विद्वत्तमः॥ वीतं विगतं भयं संसारलक्षणं वास्येति वीतभयः॥ सर्वेश्वरत्वान्नित्यमु
क्तत्वाच्च पुण्यकरं श्रवणं कीर्तनं चास्येति पुण्यश्रवणकीर्तनः॥ य इदं शृणुयान्नित्यं यश्चापि परिकी
र्तयेत्॥ नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानव इति

वचनात्॥ ॥११॥

ॐ
वि॰टी॰
५२

संसारसागरादुद्धारयतीति उद्धारणः॥ दुष्कृतीः पापसंज्ञिनाहंतीति दुष्कृतिहा॥ स्मरणादिकृत्वेनं सर्वेषां दुरपंकरोतीति सर्वेषां कृतिस्तदनलतया वाचा दुरपमाचष्ट इति वा दुरपः॥ भाविनीतु र्यस्य स्तुवकानदुःखप्रज्ञाशायतिध्यानात्‌ स्तनःकीर्तिः दत्तिनश्रुतिदुःखप्रनाशनः॥ विविधाः संसारिणां गती मुक्तिप्रदानेनहंतीति वीरहा॥ सत्त्वगुणमधिष्ठाय तत्र गच्छति इति स्तनीतिरत्नणः॥ नयादित्वात्कर्त्तरिल्युः॥ सत्त्वानुगर्वभितिनः संनयन्दुर्गुणं विषयविनयम्‌ इत्यर्थस्तएववर्ते नेइतिसतः॥ सर्वाः प्रजाः प्राणरूपेणजीवनः॥ परितः सर्वतो विश्वव्यापावस्थितइतिपर्य

उद्धारणो दुष्कृतिहा दुरपोदुःखप्रनाशनः॥ वीरहा रत्नणः संतो जीवनः पर्यवस्थितः
२२॥ अनंतरूपोनंतश्रीर्जितमन्युर्भयापहः॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशोदि
शः॥२३॥

वस्थितः॥२२॥ अनंतानादिरूपेण विश्वप्रपंचरूपेण स्थितइति अनंतरूपः॥ अपरिमितास्त्रीः परमाशक्तिरस्येति अनंतश्रीः परादस्य शक्तिर्विविधैव श्रूयतइति श्रुतेः॥ मन्युः क्रोधोजितो येनसजितमन्युः॥ भयं संसारजं दुःखं सांप्रपन्नभ्यापहः॥ व्याप्यसमवेतस्य चतुरस्रः॥ सुसाकल्पात्‌ रूपं फलेप्रयच्छतीति आत्मस्वरूपफलेप्रयच्छतीति अत्मस्वरूपं॥ चितवागभीरं परिकल्पमशक्यमस्येति गभीरात्मा॥ विविधानि फलानिअधिकारिभ्यो विशेषेण दिशन्‌ विदिशः॥ विविधामाज्ञाशक्रादीन्‌ कारयन्‌ व्यादिशः॥ समस्तानां कर्मणां फलानि दिशन्‌ दिशः॥ आदि

निदिशः॥२३॥

राम
५२

आदिकारणमस्यनविद्यतेअनादिः॥ सर्वकारणत्वाद्‌ भूताधारः भुवः सर्वभूतानामाश्रयत्वेन प्रसिद्धा या भूम्याः भुवोपि भूरिति भूर्भुवः॥ अथवा भूर्भुर्लोकः भुवर्भुवर्लोकः लक्ष्मीरात्मविद्या आत्मविद्या च देवि त्वमित्यादिश्रीस्तुतेः॥ भूम्यंतरिक्षयोः शोभा इति वा भूर्भुवोलक्ष्मीः॥ शोभनाविविधा ईरणगतयोस्येति शोभनं विविधमीरितं इति वा सुवीरः॥ रुचिरे कल्याणे अंगदे अस्येति रुचिरांगदः॥ जनयतीति जननः॥ ल्युः पिधो बहुलग्रहणात्कर्तरिल्युट्‌ प्रत्ययः प्रयोगवचनादिवत्‌॥ जनस्य जनिमतोजन्मउद्भवः॥ नस्य आदिमूलकारणं भवतीति जनजन्मादिः॥ भयहेतुत्वाद्भीमः॥ भीमादयोपा

अनादिर्भूर्भुवोलक्ष्मीः सुवीरोरुचिरांगदः जननोजनजन्मादिर्भीमोभीमपरा
क्रमः॥२४॥ आधारनिलयोधाता पुष्पहासः प्रजागरः॥ ऊर्ध्वगः सत्पथाचारः प्रा
णदः प्रणवः पणः॥२५॥

दानइतिनिपातान्त्‌॥ महद्भयं वज्रमुद्यतं इति मंत्रवर्णात्‌॥ असुरादीनां भयहेतुः पराक्रमो यस्य भवतारेषु इति भीमपराक्रमः॥२४॥ पृथिव्यादीनां पंचधातूनां आधारत्वात्‌ आधारनिलयः॥ स्वात्मना धृतस्य अन्योधाता नास्तीति स्वधाता॥ उत्फुल्लात्मनास्थितानां पुष्पाणां हसवत्प्रपंचरूपेण विकासोस्येति पुष्पहासः॥ नित्यप्रबुद्धस्वरूपत्वात्‌ प्रजागरः॥ सर्वेषामुपरिस्थितत्वादूर्ध्वगः॥ सतां कर्माणि सत्पथाचार एव इति सत्पथाचारः॥ मृतान्‌ जीवयन्‌ प्राणिनः प्रदत्तानि तिप्राणदः॥ प्रणवो नाम परमात्मनो वाचक ओंकारस्तदभेदोपचारेण प्रणवः॥ पणति

णानि कर्माणि फलेसंग्रह्य अधिकारभक्तस्य फलं प्र
यच्छन्बल्लन्नणपापणाइतिवा ॥१२५॥ राम॥राम॥

व वरहापर्पंकर्वञ्रितिपणः॥ सर्वालिहुपालिविविं
त्पधीरोनामानिकृत्वाभिवदप्यास्तइतिश्रुतेः॥३

प्रमितिः संविदात्मस्वरूपं प्रमाणं ॥ प्रज्ञानं ब्रह्मेति श्रुतेः ॥ ज्ञानस्वरूपमत्यंतनिर्मलं परमार्थतः ॥ तमेवा
र्थस्वरूपेण भ्रांतिदर्शनः स्थितमिति श्रीविष्णुपुराणे ॥ प्राणा इंद्रियाणि यत्र जीवे निलीयंते तमार
तं तत्त्वानं देहस्य धारकाः प्राणापानादयो वा तस्मिन्निलीयंते प्राणितीति प्राणो जीवः परे पुंसि निलीय
ते इति वा प्राणः ॥ जीवो वा संहरन्निति वा प्राणनिलयः ॥ पोषयन्नन्नरूपेण प्राणान्प्राणभृत् ॥ प्राणिनो
जीवयन् प्राणाख्यैः प्राणजीवनः ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन ॥ इतरेण तु जीवंति यस्मिन्नेता

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ॥ तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजराति
गः ॥११६॥

वुपाश्रिता इति मंत्रवर्णात् ॥ तत्त्वममृतं सत्यं परमार्थं सत्तत्त्वमिति एते एकार्थवाचिनः परमार्थसतो ब्रह्म
णो वाचकाः ॥ तत्त्वं स्वरूपं यथावद्वेत्तीति तत्त्ववित् ॥ एकश्चासावात्मा चेति एकात्मा आत्मा वा इदमेक एवाग्र आसी
दिति श्रुतेः ॥ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ॥ यच्चास्य संततो भावस्तस्मादात्मेति गीयते इति स्मृते
श्च ॥ जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकाराः ॥ तानतीत्य गच्छतीति जन्ममृ
त्युजरातिगः ॥ न जायते म्रियते वा कदाचिदिति मंत्रवर्णात् ॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता

वा न भूयः इति श्रीमद्भगवद्वचनात् ॥११६॥

भूर्भुवः स्वः समाख्यानि त्रीणि आत्मनि रूपाणि शुक्राणि त्रयीसाराणि व्याहृत्या ओं इत्येतैर्होमादिना ज
गत्तरति प्लवते इति भूर्भुवःस्वस्तरुः ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते इति मनुवचनात् ॥ भूर्भुवः भू
र्भुवःस्वस्तरुः समाख्या लोकत्रयस्य सारवृक्षो भूर्भुवःस्वस्तरुः लोकत्रयं वृक्षवद्व्याप्य तिष्ठतीति
वा भूर्भुवःस्वस्तरुः ॥ संसारसागरात्तारयन्स्तारः ॥ सर्वस्य लोकस्य जनक इति सविता पितामहस्यापि
पिता इति प्रपितामहः ॥ समंतायज्ञः ॥ यज्ञानां पतिः स्वामी च यज्ञपतिः ॥ अहं हि सर्वयज्ञानां भोक्ता च
प्रभुरेव च इति श्रीभगवद्वचनात् यजमानात्मना तिष्ठन्यज्वा यज्ञाङ्गान्यस्येति वा यज्ञाङ्गः ॥ श्रीवरा

भूर्भुवस्वस्तरुस्तारः सविता प्रपितामहः ॥ य
ज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥१२०

हमूर्तिः ॥ वेदपादो यूपदंष्ट्रः क्रतुदंतः श्रुतीमुखः ॥ अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥ अ
होरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः ॥ आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ॥ धर्मसत्यमयः
श्रीमान् क्रमविक्रमसत्क्रियः ॥ प्रायश्चित्तनखो धीरः पशुजानुर्महाभुजः ॥ उद्गात्रहोमलिङ्गः फलबीज
महौषधिः ॥ वाय्वंतरात्मा मंत्रस्फिक्विकृतः सोमशोणितः ॥ वेदिस्कंधो हविर्गंधो हव्यकव्यातिवेग
वान् ॥ प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरर्चितः ॥ दक्षिणाहृदयो योगी महासत्रमयो महान् ॥ उपा
कर्मोष्ठरुचकः प्रवर्ग्यावर्तभूषणः ॥ नानाछंदोगतिपथो गुह्योपनिषदासनः ॥ छायापत्नीसहायो वै

मेरुशृंगादयोऽङ्गिनः ॥ इति श्रीहरिवंशे फलहेतवः

॥१२०॥

श्रीं वि॰ स॰ ५५

यज्ञं बिभर्त्ति भातीति यज्ञभृत्॥ जगदादौ तदन्ते च यज्ञं करोति कृन्ततीति वा यज्ञकृत्॥ यज्ञानां तु समारा-
धनात्मना यज्ञस्तस्य स्वरूपं तत्स्वरूपमस्यास्तीति यज्ञी॥ यज्ञं भुनक्तीति यज्ञभुक्॥ यज्ञसाधनतयाशी-
नीति यज्ञसाधनः॥ यज्ञस्यान्तं फलप्राप्तिं करोतीति यज्ञान्तकृत्॥ वैष्णव्या ऋचा संततेन वैष्णव्यूहकृता-
सनेन पूर्णाहुत्या समाप्तिं करोतीति वा यज्ञान्तकृत्॥ यज्ञानां गुह्यं ज्ञानयज्ञः फलाभिसंधिरहितो वा य-
ज्ञस्तदभेदोपचाराद्यज्ञगुह्यम्॥ अद्यते अत्ति वा भूतानीत्यन्नम्॥ अन्नमत्तीति अन्नादः॥ सर्वं जगन्नादृ-
रूपेण भोग्यभोक्त्रात्मकमेवेति दर्शयितुमेवकारः॥११८॥ सर्वेनाम्नामेकस्मिन्नास्मिन्नुपसमर्थत्वम्? ...
दर्शयितुं आत्मैव योनिरुपादानकारणं नान्यदिति आत्मयोनिः॥ निमित्तकारणमपि स एवेति दर्शयि-

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः॥ यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च॥११८॥ आ-
त्मयोनिः स्वयंजातो वैखानः सामगायनः॥ देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः॥

तुं स्वयंजात इति प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधादित्यनयोर्नाम्नोरुभयकारणत्वोपसंहारः॥ विशेषे-
ण खननं वैखनः॥ धरणीं विशेषेण खात्वा पातालवासिनं हिरण्याक्षं वाराहरूपमास्थाय जघानेति पु-
राणे॥ सामानि गायतीति सामगायनः॥ देवक्याः सुतो देवकीनन्दनः॥ ज्योतींषि शुक्राणि च यानि लो-
के त्रयो लोका लोकपालास्त्रयी च॥ त्रयोऽग्नयश्चाहुतयश्च पंच एवेति श्रीमहाभारते॥ यतः स्रष्टा स-
र्वलोकस्य क्षितेर्भूमिरीशो दशरथात्मजः क्षितीशः॥ कीर्त्तितो ध्यानः संस्मृतः पापराशिं विनाशयन्पा-
पनाशनः॥ पक्षोपवासाद्यत्पापं पुरुषस्य प्रणश्यति॥ प्राणायामशतेनैव यत्पापं नश्यते नृणां॥ प्राण-

राम ५५

पांचजन्याख्यं भूतादिमहंकाराख्यं शंखं बिभ्रच्छंखभृत्॥ विद्यामयो नन्दकाख्योऽसिः सर्वप्रहरणायुधोऽत्र मङ्-
तिरस्यास्तीति नन्दकी॥ मनस्तत्त्वात्मकं चक्रमस्यास्तीति चक्री॥ इन्द्रियादिमहंकारात्मकं शार्ङ्गं नाम धनुर-
स्यास्तीति शार्ङ्गधन्वा॥ धनुषश्चेति समासान्तोऽनङादेशः॥ बुद्धितत्त्वात्मिकां गदां वहन्गदाधरः॥ रथाङ्गं
चक्रं चास्य पाणौ स्थितमिति रथाङ्गपाणिः॥ अत एवाक्षोभ्यः क्षोभितुं न शक्य इति अक्षोभ्यः॥ एतावन्त्यायुधानि स्थि-
तानीति एवं न नियम्यते॥ अपि तु सर्वाण्येव प्रहरणान्यायुधान्यस्येति सर्वप्रहरणायुधः॥ आयुध-
त्वेन प्रसिद्धानि करजादीन्यायुधानि भवन्तीति सर्वप्रहरणायुधवचनेन सत्यसंकल्पत्वेन
सर्वेश्वरत्वं दर्शयति॥ एष सर्वेश्वर इति श्रुतेः॥

शंखभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः॥ रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥१२०॥

द्विर्वचनं समाप्तिं द्योतयति॥ ओंकारश्च मंगलार्थः॥
ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा॥ कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥ इति वचना-
त्॥१२१॥ अनेन मङ्गलमुक्तिपरिचरणं कृतवान्॥ भूपिशाचनिवृत्तिं विधेर्मङ्गलार्थम्॥ धन्वन्तरेर्वत्स्मृतेर्वत्
नेन देवगुणप्रमहः॥ करणं स च साधिद्धिर्यज्जहाति शाङ्गमस्क्रियते॥ शार्ङ्गिणस्तु पल्लवानां॥ एकोऽपि कृष्ण-
स्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥
अतसीपुष्पसंकाशं पीतवाससमच्युतं॥ ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयं॥ लोकत्रयाधिपतिम-

नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितं ॥१२१॥ य इदं शृणु
इतीदं कीर्तनीयस्य केशवस्य महात्मनः ॥ याचिन्त्यं यश्चापि परिकीर्तयेत् ॥ नाशुभं प्राप्नुयात्किंचित्सोमुत्रेह च मानवः ॥१२२॥ वेदान्तगो ब्राह्मणः
ॐ स्यात्क्षत्रियो विजयी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥१२३॥ धर्मार्थी प्राप्नुया
वि॰ सी॰ द्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजां ॥१२४॥ भक्तिमान्यः स
५५ दोत्थाय शुचिस्तद्गतमानसः ॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥१२५॥ यशः प्राप्नोति वि
पुलं ज्ञातिप्राधान्यमेव च ॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमं ॥१२६॥ न भयं क्वचिदाप्नोति
वीर्यं तेजश्च विंदति ॥ भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥१२७॥ रोगार्तो मुच्यते रोगाद्बद्धो
मुच्येत बंधनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥१२८॥ दुर्गाण्यतितरत्याशु पुरुषः पुरु
षोत्तमं ॥ स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥१२९॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ॥
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनं ॥१३०॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्यु
जराव्याधिभयं नैवोपजायते ॥१३१॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥ युज्येतात्मसुख
क्षांतिश्रीधृतिस्मृतिकीर्तिभिः ॥१३२॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ॥ भवंति कृतपु
ण्यानां भक्तानां पुरुषोत्तमे ॥१३३॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ॥ वासुदेवस्य वीर्ये
ण विधृतानि महात्मनः ॥१३४॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसं ॥ जगद्वशे वर्ततेदं कृष्णस्य राम
सचराचरं ॥१३५॥ इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ॥ वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ ५५
एव च ॥१३६॥ सर्वागमानामाचारः प्रथमं परिकल्पते ॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१३७॥

ऋषयः पितरो देवा महाभूतानि धातवः ॥ जंगमाजंगमं चेदं जगन्नारायणोद्भवं ॥१३८॥ योगो ज्ञानं
तथा सांख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१३९॥ एको वि
ष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥१४०॥ इमं स्तवं
भगवतो विष्णोर्व्यासेन कीर्तितं ॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१४१॥ विश्वेश्वरमजं दे
वं जगतः प्रभवाप्ययं ॥ भजंति ये पुष्कराक्षं न ते यांति पराभवं ॥१४२॥ अर्जुन उवाच ॥ पद्मपत्रविशा
लाक्ष पद्मनाभ सुरोत्तम ॥ भक्तानामनुरक्तानां त्राता भव जनार्दन ॥१४३॥ श्रीभगवानुवाच ॥ यो
मां नामसहस्रेण स्तोतुमिच्छति पांडव ॥ सोहमेकेन श्लोकेन स्तुत एव न संशयः ॥१४४॥ नमोस्त्वनं
ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटी
युगधारिणे नमः ॥१४५॥ वासनाद्वासुदेवस्य वासितं मे जगत्त्रयं ॥ सर्वभूतनिवासोसि वासुदेव न
मोस्तु ते ॥१४६॥ नमोस्तु ते व्यास विशालबुद्धे फुल्लारविंदायतपत्रनेत्र ॥ येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥१४७॥ इति विघानपो घानि रघो निर्विष्नुरीडितः ॥ वाग्यतेनार्चितेनैदे
वः प्रीयतां मे जनार्दनः ॥१४८॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां शांति
पर्वणि श्रीविष्णोर्नाम्नां सहस्रं संपूर्णं ॥ शुभमस्तु ॥ इतीदमित्यनेन नाम्नां सहस्रमनूनाधिकं
उक्तं दर्शयति ॥ पृच्छामि किं जपन्मुच्येज्जंतुरिति जपहोपादानाकीर्तयेदिति ॥ अनेनापि त्रिविधो
जपो लक्ष्यते ॥ य इदं शृणुयान्नित्यादिस्पष्टार्थः ॥ वासुदेवः पादित्यादिवः परलोकप्राप्तस्याशुभप्रा
प्त्यभावे हेतुचयितुमस्तुत्रेत्युक्तं ॥ वेदांतानामंतं गच्छंतीति अवगच्छंतीति वेदांतगाः ॥ किं जपन्मु

ॐ
वि॰ही॰
५९

च्यते जंतुर्जन्मसंसारबंधनात् इत्यादिवचनात् जपेन कर्मणा चित्तशुद्धिं प्रकाशयं कर्मणां सात्वि
शुद्धिहेतुत्वनाशित्वात्तेन न मोक्ष इति दर्शयितुं वेदान्तगोत्राह्मणाः स्यादिस्मृतं ॥ कर्मणा तत्र
शुद्धिहेतुत्वं कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्के
नः करणशुद्धिद्वारेण मोक्षहेतुत्वं कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः कषाये कर्मभिः पक्क
ततो ज्ञानं प्रवर्तत इति ज्ञानं समासाधनरोवेधान्यत्तुच्यते ॥ धर्मान्त्यवंचज्ञानं चज्ञानान्मोक्षोधिगम्य
ते ॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥ कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते ॥ तस्मात्कर्म न
कुर्वंति यतयः पारदर्शिनः ॥ यद्यप्यन्यपि कर्माणि परिहाय द्विजोत्तमः ॥ आत्मज्ञाने शमे च स्यात्
दाभ्यासे च यत्नवानिति मानवं वचनं ॥ तपसा कल्मषं हंति विद्ययामृतमश्नुते इति च ॥ ज्ञानमुत्पद्यते पुंसां
क्षयात्पापस्य कर्मणः ॥ यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि इत्यादि स्मृतिभ्यश्च ॥ तमेवं वेदानु
वचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति ॥ येन केन च यजेतापि दार्विहोम
नश्यंतु पहतमना ज्ञानप्राप्य भवति इति श्रुतिभ्यश्च ज्ञानादेव मोक्षः ॥ ब्रह्मविदाप्नोति परं ॥ तरति शोक
मात्मवित् ॥ ब्रह्मविद्ब्रह्मैव भवति ब्रह्मैव सन् ब्रह्माप्येति ॥ तमेवं विदित्वाति मृत्युमेति नान्यः पंथा वि
द्यतेयनायेति ॥ विद्वान्न बिभेति कुतश्चनेति ॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती वि
नष्टिः ॥ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः ॥ तदा शिवमविज्ञाय दुःखस्यांतो भविष्यतीति ॥ न कर्म
णा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः
शुद्धसत्वाः ॥ ते ब्रह्मलोके तु परांतकाले परामृताः परिमुच्यंति सर्वे इत्यादि श्रुतिभ्यः ॥ सूक्ष्मं सुखम ५९
वाप्नुयात् सर्वेणैव नतु जपयज्ञेनेति ॥ तस्मात्कर्मणा ... ॥ या

ॐ
वि॰ही॰
६०

दये हतुर्वर्णानित्यादिभारतायै श्रवणानुज्ञाने ॥ सुगतिमिष्टावत्वा च शुद्धयो निरितिद्धवद शोभ
विशेषचातुर्वर्णान्ने ॥ भक्तिमानित्यादिना भक्तिमतः शुचेः सततं तेन वशुद्धसत्वं प्रकाशविज्ञानविशि
ष्टाधिकारिणः फलविशेषं दर्शयति ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिरित्यादिना स्तुत्यस्य श्री
ममस्तपद्रवं चक्रायाभवं तीति स्मृत्वासर्वं न भवतीत्यर्थः ॥ द्यौः सचंद्रार्कनक्षत्रेत्यादिना स्तुत्यस्य श्री
वासुदेवस्य माहात्म्यकथनेन उक्तानां फलानां प्राप्तिर्वचनं यथार्थकथनेनार्थवाद इति दर्शयति
सर्वागमानामाचारः प्रथमं परिकल्पते ॥ आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ इत्येतेन श्रोत
एवाक्येन सर्वधर्माणामाचारवत एवाधिकार इति दर्शयति ॥ इमं स्तवमित्यादिना सहस्रनामस्तो
त्रस्य भगवता श्रीकृष्णद्वैपायनेन नारायणेन कृतमिति सर्वैरपि भिः पठितव्यं सर्वफलसिद्धये इति
दर्शयति ॥ विश्वेश्वरमित्यादिना विष्णोरुपासनादेवत्वानां सुस्थापत्याः कृतार्थाः ... दर्शयति ॥ आर्त
यंति प्रमादात्कुर्वतां कर्मप्रच्यवेताध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ सहस्रनामस्त
वं यस्यास्तीति धनवं तं धनेकथा ॥ न याचे द्विष्णुकर्तारं कोन्यस्तद्वाधनं धनात् ॥ सहस्रनामस्त
वं त्यक्त्वा सर्वस्वोपायं हि ॥ श्रुतिस्मृतिन्यायमालारचिता हरिपादयोः ॥ इति श्रीपरमहंसप
रिव्राजकाचार्यश्रीशंकराचार्यविरचितं श्रीविष्णुसहस्रनामभाष्यं संपूर्णम् ॥ शुभं भव
राम राम
राम राम लेखकपाठकयोः ॥